A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RANGACHARYA, M.A., RAO BAHADUR,

CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY; AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE.

PREPARED UNDER THE ORDERS OF THE GOVERNMENT OF MADRAS.

VOL. II.—VEDIC LITERATURE.

MADRAS:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1905.

1005

CONTENTS.

CLASS I.—VEDIC LITERATURE.

iii.—(1) VĒDALAKṢAṆA (ŚIKṢĀ AND CHANDAS).

iii.—(1) VĒDALAKṢAṆA (ŚIKṢĀ AND CHANDAS)—*continued.*

iii.—(1) VĒDALAKṢAṆA (ŚIKṢĀ AND CHANDAS)—*continued.*

(2) NIRUKTAM.

(3) JYAUTIṢAM (VĒDĀṄGA).

iv.—KALPA AND THE ALLIED SŪTRAS.

iv.—KALPA AND THE ALLIED SŪTRAS—*continued.*

iv.—KALPA AND THE ALLIED SŪTRAS—*continued.*

iv.—KALPA AND THE ALLIED SŪTRAS—*continued.*

1005

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS,

VOLUME II.

CLASS I.—VEDIC LITERATURE.

iii. (1) Vēdalakṣaṇa (Śikṣa and Chandas).

No. 853. अनिङ्ग्यम्.

ANIṄGYAM.

Substance, palm-leaf. Size, 8¼ × 1¼ inches. Pages, 29. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 24*b*. The other works herein are—Saṁhitāśamānam 1*a*, Vilaṅghyam 6*a*, Naparam 12*a*, Taparam 15*a*, Avarṇi 16*a*, Āvarṇi 21*b*, Ṣaḍviṁśatisūtram 39*a*, Vēda-lakṣaṇaviṣayakam 65*a*.

Complete.

This is a work in 100 stanzas giving a list of certain Vēdic words which appear to be capable o· being split up in the Pada-pāṭha of the Taittirīya-Saṁhitā, but are really indivisible in that manner.

The author of this work is Śrīvatsāṅka, son of Dēvamaniṣī.

Beginning:

मुनिमानसमन्थानमथिता[गस]गमसागरात् ।
उदिताय नमो भूयादमृताय मुरारये ॥

गुणत्रयाविहानाय जगत्रयाविधायिने ।
श्रुतित्रयदृशे शश्वत् पुरत्रयमथे नमः ॥
नमस्कृ(त्य) विनेतारं विघ्नानामनुशिष्यते ।
अनिङ्ग्यमिङ्ग्यसादृश्याद्यत्सन्देहात्प(स्प)दं पदम् ॥
श्रुतिश्रुच्छब्दनिर्दु(र्दि)ष्टं विकृतश्चापदात्मकैः ।
स्यादनन्यवदङ्काराद्यकारादि च यत्पदम् ॥
भिर्भ्याम्भ्यस्सुभिरर्वागोभावं ह्रस्वभागदीर्घश्च ।
नित्यं विहाय न(ने)ङ्ग्यं गोगीस्सुरदुग्दु चेति भिश्श्रुत्या ॥

End:

हेमन्तहोत्रीयहिरण्ययश्रुतो हैमन्तिकश्रुच्च हिकं हिरण्मयम् ॥
प्रपञ्चत्वादनिङ्ग्यानां दिङ्मात्रमिह सूचितम् ।
अतोऽनुक्तश्च यत्किञ्चिदुन्नेयन्तन्मनीषिभिः ॥
एषानिङ्ग्य(पदानां)पदवी सन्दर्शिता [सुधा] सुखी(धि)या ।
देवमनीषिसुतेन श्रीवत्साङ्केन तैत्तिरीयाणाम् ॥
इत्यनिङ्ग्यस्य ग्रन्थं नानावृत्तं शतं भवेत् ।

Colophon:—इत्यनिङ्ग्यं समाप्तम् ॥

No. **854.** अनिङ्ग्यम्.

ANIṄGYAM.

Substance, palm-leaf. Size, 17¼ × 1½ inches. Pages, 10. Lines, 7 on a page. Character, Telugu. Condition, injured and worm-eaten. Appearance, old.

Begins on fol. 34*b*. The other works contained herein are Ratnatrayaparīkṣā with commentary (1*a*), Sarpabaliprayōgaḥ (3*a*), Tripuṇḍravidhiḥ (5*a*), Agnihōtrasthālīpākavidhiḥ (5*b*), Kūśmāṇḍa-hōmakalpaḥ (6*a*), Vaidikavijayadhvajaḥ (7*a*), Uccōdarki (34*a*),

Siddhāntaśikṣā (39*a*), Paitṛmēdhikaprayōgaḥ (44*a*), Yajñōpavīta-vidhiḥ (50*a*), Kṛṣṇayajurvēdamantrapraśnaḥ (51*a*), Āpastamba-gṛhyam (65*a*), Ṣaḍviṁśatisūtram (81*a*), Śamānam (88*b*), Naparam (90*b*), Taparam (91*b*), Avarṇi (93*a*), Avarṇi (95*a*), Svarasaṅkhyā (96*a*), Chāyāpuruṣalakṣaṇam (98*b*), Indrākṣīstōtram (100*a*), Mṛtyulāṅgūlamantraḥ (101*a*), Lakṣaṇaratnaparibhāṣā (103*a*), Bhāradvājasūtram (109*a*).

Complete.

This begins as follows :—

आनिङ्ग्यमिङ्ग्यसादृश्याद्यत्सन्देहास्पदं पदम् ।
श्रुतिश्रुच्छब्दनिर्दिष्टं विकृतश्चापदात्मकैः ॥

No. 855. अनिङ्ग्यम् सव्याख्यानम्.

ANIṄGYAM WITH COMMENTARY.

Substance, paper. Size, 12¾ × 8 inches. Pages, 58. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 42*a*. The other works herein are Saṁhitāśamānam with commentary (1*a*), Avarṇi with commentary (12*a*), Āvarṇivyākhyā (20*a*), Naparam with commentary (24*a*), Taparam with commentary (31*a*), Vilaṅghyam (32*b*), Visarjanīyōttaraśakāraparaḥ (70*a*), Śākhāśamānam (71*a*), Siddhāntaśikṣā with commentary (74*b*), Siddhāntaśikṣā (112*b*), Mairāvaṇacaritram (117*a*), Kuśalavōpākhyānam (147*a*).

Complete.

The name of the author of the commentary is not mentioned.

Beginning :

दुग्धवारिधिसुतामभीष्टदां सम्प्रणम्य सकलामरैः स्तुताम् ।
मेदिनीसुरमनोहरां मयानिङ्ग्यवृत्तिरभिधास्यते यथा ॥

तत्र चादौ श्लोकत्रयेण प्रारिप्सितस्य शास्त्रस्याविघ्नपरिसमाप्तये मङ्गलमादधानोऽभीष्टदेवतां नमस्कृत्य विषयं दर्शयति अनिङ्ग्यमनुशिष्यत इति ।

मुनिमानसमन्थानमथितागमसागरात् ।
उदिताय नमो भूयादमृताय मुरारये ॥

वेदवेदान्तविदां मुनीनां मानसमेव मन्थानः तेन मथितात् चिन्तितात् आगमो वेदः स एव सागरः तस्मादुदितः आविर्भूतः शेषं व्यक्तम् ॥

गुणत्रयविहीनाय जगत्रयविधायिने ।
श्रुतित्रयदृशे शश्वत् पुरत्रयमथे नमः ॥

गुणानां त्रयं गुणत्रयम् । एवमुत्तरेषामपि त्रयाणां विग्रहः सत्त्वरजस्तमोगुणरहितः अणिमादिगुणान्वित इत्यर्थः । सृष्टिस्थितिलयरूपेण पृथिव्यादि लोकत्रयं विदधातीति लोकत्रयविधायी । वेदत्रयञ्चक्षुर्यस्यासौ श्रुतित्रयदृक् । पुरत्रयमथे तेषामसुराणामित्यनुवाके रुद्र इत्यब्रुवन्निति रुद्रशब्देन विवाक्षितपुरुष इति तस्मा अयन्नमस्कारः ।

नमस्कृत्य विनेतारं विघ्नानामनुशिष्यते ।
अनिङ्ग्यमिङ्ग्यसादृश्यात् यत्सन्देहास्पदं पदम् ॥

विघ्नानां विनेता विनायकः तञ्च नमस्कृत्य वक्ष्यमाणविषयन्दर्शयति किमिति अनिङ्ग्यमनुशिष्यत इति । अनिङ्ग्यमित्यविभागपदमुच्यते न तु समासपदं सत्यपि समासत्वेऽपि अञ्जसा न युज्यते प्रकृतिपरत्वोपपत्तेः अन्यथा त्वनुदात्तं पदमेकवर्जितमिति तावदन्त्यगतः पदानामेकाक्षरवर्जमनुदात्तता विहितेति अनेकोदात्तत्वं न भवति । अपि च अङ्ग्यो दिग्म्य इत्येवमादीनामसमासपदानामपि विभागत्वेनेङ्ग्यत्वात् अविभागपदमेवानिङ्ग्यमिति युक्तम् । अनुशासनं शिक्षणम् इदमेव प्रयोक्तव्यम् ॥

End:

एषानिङ्ग्यपदानां पदवी सन्दर्शिता सुधिया ।
देवमनीषिसुतेन श्रीवत्साङ्केन तैत्तिरीयाणाम् ॥

अनेन तैत्तिरीयशाखामधिकृत्य इदं शास्त्रं प्रदर्शितं शास्त्रविदो जन्मनामकीर्त्यविच्छेदाय ॥

No. 856. अनिङ्ग्यं सव्याख्यानम्.

ANINGYAM WITH COMMENTARY.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 50. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, not old.

Complete. Same as the last.

Begins on fol. 29*a*. The other works contained herein are Vilanghyam with commentary (1*a*), Naparam with commentary (11*a*), Taparam with commentary (16*b*), Prātiśākhyavivaraṇa Tribhāṣyaratna (19*a*), Samānasandhi with commentary (54*a*), Avēṣṭanapadāni (78*a*), Rāvaṇabhēṭ (81*a*), Saptasvaralakṣaṇa (92*a*), Yājyasaṁjñā (92*a*), Avēṣṭananāmāvali (93*a*).

Colophon:

इत्यनिङ्ग्यव्याख्यानं समाप्तम् ॥

कल्याणं कुरुतां प्रपञ्चपितरौ तौ नश्शिवौ दम्पती
मूर्ताधीश्वरतायया‍न्सितवृषाव्याजात्स्वमेवास्थितौ ।
यौ नित्यौ समलङ्कृतौ श्रितहृदावन्योन्यमन्तर्धिया
मल्लीलायसमावभिन्नविजनाभावादिव प्रेमतः ॥

नारायणावधान्यो(न्यु)पाध्यायस्य पुस्तकम् ॥

No. 857. अन्तप्रदीपिका.

ANTAPRADĪPIKĀ.

Substance, palm-leaf. Size, 14 × 1⅝ inches. Pages, 3. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 41*b*. The other works herein are Smṛtimuktāphalam 1*a*, Ṣaḍviṁśatisūtram 7*a*, Vilanghyam 13*a*, Naparam 15*a*, Uccōdarki with commentary 17*a*, Yōhiprāptibhāṣyam 22*a*, Yōhi-

prāptiḥ 36a, Uccasvaranirṇayaḥ 39a, Svarāṣṭakam 41b, Plutānuśāsanam 42b, Kriyāsvaralakṣaṇam 44a, Thadhakārasūtram 54a, Pūrvōttarobhayadīrghī 46a, Lakṣaṇaratnam 47a, Trikramalakṣaṇam 54a, Sarvalakṣaṇavēdapāṭhaphalam 55a.

Complete.

This gives a list of words in the Kṛṣṇayajurvēda ending in long vowels and followed by the Visarga, and also indicates where the words ending in long vowels are followed by the Visarga and where not. This work is helpful in enabling one to remember well the Padapāṭha of the Vēda.

Beginning:

अथान्तप्रदीपिका ।

दीर्घा विसर्जनीयान्ता विरामेषु तु संस्थिताः ।
ये शब्दास्संहितायां स्युस्ते ज्ञाप्यन्तेऽधुना मया ॥
वर्णक्रमेण गृह्यन्त एते शब्दा यथाक्रमम् ।
व्यवहारोऽत्र भेदेन समासपदभागयोः ॥
अन्तप्रदीपो नामेदं लक्षणं क्रियते मया ।
वेदात्मा भगवान्विष्णुरन्तेन प्रीयतां मम ॥ इति परिभाषा ॥
अना अर्का अगा अद्रेररातीरप्यरोचथाः ।
अप्रा अश्वा अनीके(का) स्यादजिरा अग्निया अपि ॥
अन्तोदात्तकमग्ने(ग्रा) स्यादश्रमिष्ठा अजायथाः ।
अक्ष्योरंहो अमीवास्स्यादश्वैरस्या अ . प्यते ॥

End:

शरीरैरपि शुष्माश्रीश्शंभुस्स पर एव च ॥
सूनोस्साधोस्सुतास्साविस्सेनास्सत्यानसं परः ॥
सूराः प्रसूवरीस्साह्वा हिता होत्रा हिरण्ययोः ।
हिरण्यैर्हस्तयोरत्र नैभ्यस्सन्त्वधिकाः खलु ॥

Colophon:

अन्तप्रदीपलक्षणं सम्पूर्णम् ॥

No. 858. अवर्णि.

AVARṆI.

Pages, 11. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 853.

Complete.

This work is intended to help the students of the Taittirīya-Saṁhitā in finding out where an initial अ or आ of words is merged in the final ओ, ए or आ of the immediately previous words under the rules of Sandhi.

The author proposes to supply the omissions, to omit the excesses and to correct the errors found in the list of words given in another work of the same name forming 'part of the Varṇalakṣaṇa of ancient authors' (probably this reference being to a Prātiśākhya).

The author also says that he has added a commentary of his own, which, however, is not found in this codex, but is found in the MS. described under No. 860.

Beginning:

अवर्णीन्यनुक्तासमोऽप्यातिरिक्तं (अवर्णिन्यनुक्तं समाप्यातिरिक्तं)
परित्यज्य दुष्कीर्तितश्चाभिवीक्ष्य ।
ककारादिवर्णक्रमेणाहमेतं
सवृत्तिं करिष्यामि विस्पष्टवाच्यम् ॥ 1 ॥
ओदेदवर्णसञ्छन्नं संहितायां पदादिगम् ।
अवर्णं ज्ञातुमस्माभिरिदं शास्त्रं प्रणीयते ॥ 2 ॥
नोदात्तो यः पदाध्याय उदात्तस्संहितागमे ।
यश्चोदात्तः पदाध्याये स्वरितस्संहितागमे ॥ 3 ॥
अघोषाक्षरतः पूर्व ओकारस्स(सां)हितश्च यः ।
तेभ्यः परं पदाध्य(ध्या)ये त्वकारस्स्यात्पदादिगः ॥

End:

अहरश्चाहरन्ताहाः अहार्षश्चाहुतादहम् ।
अहास्थाहरताश्चैवेत्युक्तो ह्रस्वस्य सङ्ग्रहः ॥

No. 859. अवर्णदीपः.

AVARṆADĪPAḤ.

Substance, paper. Size, 12¾ × 7½ inches. Pages, 4. Lines, 30 in a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Begins on fol. 88*b*.

The following other works are contained in the codex.

	Fol.		Fol.
Rasārṇavasudhākara ..	1*a*	Āpastambōpākarmaprayōga	92*a*
Śamānam	85*a*	Kavikalpalatā ..	99*a*
Vilaṅghyam	87*a*	Pārvatīpariṇayam ..	135*a*
Āvarṇi	90*a*	Aśvaśāstram (Śālihōtrīyam) with Telugu notes	151*a*
Naparam	90*b*		
Taparam	91*b*		

This is a mnemonic work, similar to the one described under No. 858, and treats of words beginning with अ or आ in the Ṛg-Vēda. The author of the work is one Dakṣiṇāmūrti of Vatsagōtra.

Beginning:

गुरुं गुणाब्धिं निखिलार्थवाङ्मयं
प्रणम्य संसारसमुद्रतारकम् ।
पदाद्यवर्णावगमाय वच्म्यृचा-
मवर्णदीपाख्यमहं सुलक्षणम् ॥ 1 ॥

अत्रेष्टौ सौ वेदवर्णौ सुच्छन्नोऽ-
थाकारादीन्येतदन्तात्पराणि ।
उच्चो नोच्चस्वार उच्चोऽपि ·सान्ध्ये
पद्ये दीर्घो ह्रस्वभागः प्लुतश्चेत् ॥
युक्तानुक्तस्वारवर्गान्त्ययुक्त·
रा(मा)नुस्वारास्संहितायाः पराश्चेत् ।
इङ्गचं नानाचित्रितोऽसिश्वतैतान्
हित्वा घोषोदेतिरोत्सांहितश्च ॥

End:

अहन्यो ह्यनहिंसन्तीरहिन्वन्नप्यहेम च ।
अहं न याह्यः पूर्वो ह चक्रे चंक्रे यथामति ॥
श्रीवत्सदक्षिणामूर्तिविदुषाकारसङ्ग्रहः ।
अकारादिपदानान्तु कृतो विद्वद्भिरिष्यताम् ॥

Colophon:

अवर्णं संपूर्णम् ॥

No. **860.** अवार्णं—सव्याख्यान.

AVARṆI WITH COMMENTARY.

Pages, 7. Lines, 20 on a page.

Begins on fol. 12*a* of the MS. described under No. 855.

Complete.

This contains the commentary referred to under No. 858.

Beginning:

अवर्णा(र्ण्या)ख्यलक्षणारम्भस्य वैयर्थ्यमाशङ्क्य परिहरति–
अवर्णा(र्णि)न्यनुक्तं समाप्यातिरिक्तं
परित्यज्य दुष्कृतीन्तश्चाभि(दुष्कीर्तितश्चाभि)वीक्ष्य ।
ककारादिवर्णक्रमेणाहमेतं

सवृत्तिं करिष्यामि विस्पष्टवाच्यम् ॥

प्राचीन(ना)वर्णा(र्ण्य)ख्यलक्षणे यदनुक्तमनुपदिष्टं तदुपदिश्य यन्निरर्थकमधिकमुक्तं तत्परित्यज्य यद्दुरवगमं तदपि ज्ञात्वा सवृत्तिं व्याख्यासहितम् अकारादिवर्णक्रमासम्भवात् ककारादिवर्णानुव्यक्तं वक्तुं योग्यं यथा भवति तथैव करिष्यामीति प्रतिज्ञा । अपि च पूर्वलक्षणस्यानुक्तयधिकोक्तिदुरुक्तिभिर्दुर्बोधतया हेयत्वात्तत्परित्यज्य निर्दोषं लक्षणान्तरं प्रणीयते इत्यर्थः । अथ वक्ष्यमाणमर्थं प्रयोजनञ्चाह—

ओदेद्वणसेञ्छन्नं संहितायां पदादिगम् ।
अवर्णं ज्ञातुमस्माभिरिदं शास्त्रं प्रणीयते ॥

अस्यायमर्थः ओदित्योकारस्य ग्रहणं स च द्विविधः सांहितोऽसांहितश्च ।

End:

तमाहरन्ति(त्ते) नायजत । तस्यामःशश्चाहरन्त । पुनराहार्जातवेदाः । आ त्वाहार्षमन्तरभूः । अद्धादेकोऽहुतादेकः । सं पत्नी पत्याहं गच्छे । अब्रुवन् कथाहास्थाः । तमाहरतान्तेन ॥

Colophon:

इत्यवणव्याख्या.

No. **861**. अवर्णि—सव्याख्यान.

AVARṆI WITH COMMENTARY.

Substance, plam-leaf. Size, 15 × 1⅞ inches. Pages, 27. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

This work is the same as the one described under No. 860, but the MS. is more correct.

Complete.

Begins on fol. 89*a*.

The following other works are found in the MS.—

The fly leaf gives the contents.

	Fol.
Arghyavacanam.. ..	1*a*
Saptalakṣaṇasaṁjñādi ..	2*a*
Plutaśikṣā	15*a*
Pūrvōttarōbhayadīrgha-padapaṅkti	16*a*
Yaṇādēśadīrgha.. ..	19*a*
Yakārasyōkāraprāpti ..	19*b*
Saptadōvasyatvacittādi.	20*a*
Ṣaḍviṁśatisūtram ..	22*a*
Lakṣaṇānukramaṇikā ..	34*a*
Śākhāśamānam	35*a*
Varṇakramalakṣaṇam ..	39*a*
Plutaśikhṣā	43*b*
Trikramam	44*a*
Lakṣaṇānukramaṇikā ..	44*b*
Yōhibhāṣyam	47*a*
Svarapañcāśat	60*a*
Sandhyāvandanabhāṣya.	63*a*
Āvarṇi Savyākhyā ..	103*a*

No. 862. अवर्णि.

AVARṆI.

Pages, 5. Lines, 5 on a page.

Begins on fol. 93*a* of the MS. described under No. 854.

Complete. Same as the last.

Colophon :

इत्यवर्णिः समाप्तः.

No. 863. अवर्ण्यादिवर्णमालिका.

AVARṆYĀDIVARṆAMĀLIKĀ.

Substance, plam-leaf. Size, 13⅜ × 1⅛ inches. Pages, 60. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance old.

Begins on fol. 64*a*.

Almost complete.

This codex contains just another work beginning on fol. 1*a*, viz., Siddhāntaśikṣāvyākhyā.

This work gives two lists of phonetically fused words from the Yajurvēda, alphabetically arranged, and containing in the fusion such words as begin with an elided अ or आ.

Beginning:

(1) अपहतोऽररुः	(6) अपावधीम्.
(2) अग्नेऽदब्धायो.	(7) अतन्द्रासोऽवृकाः
(3) अदब्धायोऽशीततनो.	(8) अत्राह ततुत्.
(4) अच्युतोऽमात्यः	(9) अपानो अङ्गे अङ्गे.
(5) अग्नेऽयाशया.	(10) अेजराजरन्त.

End:

स्वावेशोऽसि ।

स्वाहासीनाय स्वाहापल्ययिताय पर्वः ।

स्वाहासिताय ।

स्वाहाण्डाभ्याम् ॥

No. 864. आपिशालिशिक्षा.
ĀPIŚALIŚIKṢĀ.

Substance, paper. Size, 12¾ × 8 inches. Pages, 9. Lines, 20 on a page. Character, Dēvanāgarí. Condition, good. Appearance, new. Written only on one side of the paper.

Begins on fol. 178*a*.

Complete.

The following is a list of the other works contained herein:—

	Fol.		Fol.
Jaṭāvali	1*a*	Vyāliśikṣā	44*a*
Siddhāntaśikṣā	8*a*	Kālanirṇayaśikṣā ..	45*a*
Āraṇyaśikṣā	18*a*	Kauhalīyaśikṣā	49*a*
Śambhuśikṣā	35*a*	Vyālaśikṣā	61*a*
Vāsiṣṭhaśikṣā	42*a*	Bhāradvājaśikṣā	63*a*

	Fol.		Fol.
Rāvaṇabhēṭ	81a	Jaṭāmaṇi with commentary	142a
Lōmaśaśikṣā	83a	Vyāsaśikṣā	187a
Nāradaśikṣā	94a	Yōhiprāptibhāṣyam ..	219a
Sarvasammataśikṣā ..	124a		

This is a work on Vedic phonetics in which the vowels and consonants are named and classified, and their origin is also described in accordance with the views of Āpiśali on the subject.

Beginning:

अथ शीक्षां प्रवक्ष्यामि मतामापिशलेर्मुनेः ।
गुरुलघ्वादिविज्ञानं तस्यारम्भप्रयोजकम् ॥
उक्तं तत्सर्वमङ्गेषु शिक्षाव्याकरणेषु यत् ।
विकल्पभाजां शास्त्राणामपि दृष्टानुवर्तिनाम् ॥
तत्तच्छाखाविशेषेषु व्यवस्थार्थमिदं स्मृतम् ।

End:

स्पृष्टत्वमीषत्स्पृष्टत्वं संवृतत्वं तथैव च ।
विवृतत्वञ्च वर्णानामन्तःकरणमुच्यते ॥
कालो विवारस्संवारः श्वासनादावघोषता ।
घोषोऽल्पप्राणकालैव महाप्राणः स्वराश्रयः ।
बाह्यं करणमाहुस्तान् वर्णानां वर्णवेदिनः ॥

Colophon:

इत्यापिशलिशिक्षा ॥

No. 865. आरण्यशिक्षा.

ĀRAṆYAŚIKṢĀ

Pages, 17. Lines, 20 on a page.

Begins on fol. 18a. of the MS. described under No. 864.

Complete.

The first verse evidently belongs to a commentary, but the codex contains only the text ; hence that verse is out of place.

This is a work dealing with the accent and pronunciation of words occuring in the Taittirīya Āraṇyaka.

Beginning :

विघ्नराजं प्रणम्यादौ वासुदेवं च कामदम् ।
आरण्यशिक्षाव्याख्यानमहं वक्ष्ये यथामति ॥ १ ॥
गणपतिमभिवन्द्यावति(घ)जातामयघ्नं
स्वरपदमितिवर्णोद्बोधनं शीलनेन ।
क्षितिसुरगणहेतोरेतदारण्यशिक्षा-
मृतमिह नवशिक्षावारिधेरुद्धरामि ॥ २ ॥
आद्युदात्तानि वाक्यानि चैकद्वित्र्यादिसंख्यया ।
विविधानि तु बृन्दानि विस्पष्टान्यत्र कृत्स्नशः ॥ ३ ॥
उदाह्रियन्तेऽध्येतॄणां सन्देहानां निवृत्तये ।
आदिमध्यान्तग्रहणं क्रियते यत्र तत्र तु ॥ ४ ॥
वाक्यानामिति मन्तव्यं श्रुतित्वे(ष्वे)कश्रुतेरिति ।
भवेतामाद्युदात्तौ च यत्तच्छब्दौ तु सर्वतः ॥ ५ ॥

End :

लक्षणेन विना विद्या विमलापि न शोभते ।
अप्राणस्येव देहस्य भूषणैरप्यलङ्कृतम् ॥ १२८ ॥
इत्थं न्यरूपि सकलं स्वरवर्णजालं
स्वाध्यायपञ्चसु मुदे निगमे पटूनाम् ।
आरण्यके यदिह किञ्चन यान्नि(न न्य)रूपि ।
तद्बुद्धिमद्भिरखिलं स्वयमूहनीयम् ॥ १२९ ॥

No. 866. आरण्यशिक्षा सव्याख्या.

ĀRAṆYAŚIKṢĀ WITH COMMENTARY.

Substance, palm-leaf. Size, 15⅞ × 7⅜ inches. Pages, 38. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Begins on fol. 1*a*.

The other works contained herein are Svarapañcāśat fol. 20*a*. Āraṇyaśaminasandhi 23*a*, and commentary 24*a*, Vēdalakṣaṇa-praśaṁsā 27*a*, Āvarṇi 28*a*.

Beginning:

प्रारिप्सितप्रतिबन्धकविघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् शिष्यावधानार्थं चिकीर्षितं प्रतिजानीते—

गणपतिमभिवन्द्यावद्यजालामयघ्नं
स्वरपदमितिवर्णोद्बोधनं शीलनेन ।
क्षितिसुरगणहेतोरेतदारण्यशिक्षा-
मृतमिव नवशिक्षावारिधेरुद्धरामि ॥

अवद्यजालामयघ्नं विघ्नसमूहात्मकव्याधिनाशनमिति गणपतिविशेषणम् । शीलनेन अभ्यासेन स्वरपदमितवर्णोद्बोधनमित्यारण्यशिक्षामृतविशेषणम् आरण्यशिक्षायामादौ प्रतिपाद्यमाह—

आद्युदात्तानि वाक्यानि चैकद्वित्र्यादिसङ्ख्यया ।
विविधानि तु बृन्दानि विस्पष्टान्यत्र कृत्स्नशः ॥

End:

यदिह किञ्चनेति इह ग्रन्थे किञ्च(न) निरूपणीयं यन्न न्यरूपि तदखिलं बुद्धिमद्भिः स्वयमूहनीयं सम्प्रदायविद्भ्योऽध्यापकेभ्यो लक्ष(ण)स्वरूपं विज्ञाय तदनुगुणलक्षणवत्तया स्वयमुच्चारणीयम् । न च सम्प्रदायादेव लक्ष्ये ज्ञाते लक्षणमकिञ्चित्करमिति वाच्यम्; गीती शीघ्री शिरःकम्पीति शिक्षावचने अनर्थ इति पदेन लक्षणज्ञानाभावे प्रत्यवायस्योक्तत्वादर्थपदस्य लक्षणपरत्वादत्रापि

ग्रन्थे लक्षणेन विना विद्येति तस्यावश्यकेनोक्तत्वात् कुत्रचिल्लक्षणेनैव सम्प्रदायस्य ज्ञातव्यत्वाच्चेत्यर्थः इति सर्वमवदातम् ॥

Colophon:

इत्यारण्यशिक्षः(क्षा) समाप्तः(प्ता) ॥

No. **867.** आरण्यशिक्षा सव्याख्या.

ĀRAṆYAŚIKṢĀ WITH COMMENTARY.

Substance, paper. Size, 13 × 8 inches. Pages, 49. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Begins on fol. 266*a*. The following is a list of the other works contained herein.

	Fol.
Yajuḥ-Prātiśākhya ..	1*a*
Prātiśākhyavyākhyānam Tribhāṣyaratnam ..	20*a*
Kālanirṇayaśikṣā ..	100*b*
Uccōdarkiṭīkā	107*b*
Bhāradvājaśikṣā ..	114*a*
Bhāradvājaśikṣāvyākhyā	120*a*
Vyāsaśikṣā with commentary	167*a*
Svaraśikṣā with commentary	253*b*
Yōhiprāptiḥ	294*b*
Lakṣmīkāntaśikṣā with commentary	300*b*
Sarvasammataśikṣā with commentary	312*b*
Yōhiprāptiśikṣā ..	334*a*

This commentary is fuller than the one described under the last number.

Beginning:

विघ्नराजं प्रणम्यादौ वासुदेवं च कामदम् ।
आरण्यशिक्षाव्याख्यानमहं वक्ष्ये यथामति ॥

प्रारिप्सितप्रतिबन्धविघ्नविघाताय कृतं मङ्गलं ग्रन्थतो निरूप(ण)स्य प्रयोजनं च दर्शयन् चिकीर्षितं प्रतिजानीते—

गणपतिमभिवन्द्यावद्यजालामयघ्नं
स्वरपदमितिवर्णोद्बोधनः(नं)शीलनेन ।
क्षितिसुरगणहेतोरेतदारण्यशिक्षा-
मृतमिह नवशिक्षावारिधेरुद्धरामि ॥

अवद्यजालामयघ्नं व्याधिवत् ग्रन्थरचनाप्रतिबन्धकसमूहविनाशकमिति गणपतिविशेषणम् । शीलनेन सम्यगभ्यसनेन स्वरपदमितिवर्णोद्बोधनमित्यारण्यशिक्षामृतविशेषणम् । आरण्यकप्रथमप्रश्ने उदात्तादिस्वरविषयेऽध्येतॄणां बहुधा विप्रतिपत्तिसत्त्वात् तन्निर्णयार्थं प्रतिजानीते ।

End:

इत्थं न्यरूपि सकलं स्वरवर्णजालं
स्वाध्यायपञ्चसु मुदे निगमेत(मोत्त)राणाम् ।
आरण्यके यदिह किंचन न न्यरूपि
तद्बुद्धिमद्भिरखिलं स्वयमूहनीयम् ॥

ननु सकलं स्वरवर्णजालं निरूपितमित्यसङ्गतं स्वाध्यायब्राह्मणे अम्भस्य पारे इति प्रश्ने च स्थितानां श्रुतिवाक्यानामुदाहृतत्वेऽपि प्रथमप्रश्नाशिक्षामिति प्रश्ने ब्रह्मवल्ल्यां भृगुवल्ल्यां स्थितानां श्रुतिवाक्यानामनुदाहृतत्वात् । न चादिमैकपदे ह्युच्चमित्यादिना लक्षणस्याभिनिहितत्वे लक्षणजालं सर्वं निरूपितप्रायमेव यथा गोस्सास्नादिमत्त्वे लक्षणेऽभिनिहिते तल्लक्षणाक्रान्ता सर्वापि व्यक्तिर्गौरिति निरूपितप्रायेति वाच्यम्; वैषम्यात्तत्र सास्नादिमत्त्वलक्षणस्य सिद्धत्वेन तद्दि(शि)ष्टा सर्वापि व्यक्तिर्गौरिति सुज्ञानम्; प्रकृते तु उदात्तादिस्वराणां पुरुषोच्चारणाधीनत्वेन अन्यथाप्युच्चारणसम्भवेन असिद्धत्वात् तथा च लक्ष्ये उदाहृत इदमिदं श्रुतिवाक्यमिति विज्ञाय भवदुक्तलक्षणज्ञो भवति । अतः त्वं वै पूर्वं समभूः । त्वमिदं पूर्वः कुरुष्वेति । पुरश्च हिरण्मयीमित्यादौ उदात्तपूर्वस्तैरोव्यञ्जन इत्यर्थः । नोदात्तस्वरितपर इति निषेधाप्रवृत्तिरत्र विशेषो द्रष्टव्यः ।

चित्त्यादिप्रश्नत्रितये संहितावत् स्वरो भवेत् । इतरेषु पञ्चसु प्रश्नेष्वपि अनुक्तविशेषं वाक्यजालं संहितातुल्यस्वरमित्याह—

एकश्रुत्यादिकं वाक्यं विना सत्यसमस्वरम् ।
प्राप्नोत्येवोमिति परे ह्यवर्णान्तस्सदाशिवोम् ॥

सुब्रह्मण्यं परं रूपं नवोमित्यादि सर्वतः । पदान्तादवर्णादोमित्यस्मिन् परे पूर्वपरयोः स्थाने पररूपमेकादेशःस्यात् । यथा सुब्रह्मण्योꣳ सुब्रह्मण्योꣳ सुब्रह्मण्योम् । ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

आरण्यके तु वाक्यान्ते उदात्तो नम उच्यते ।
नो पते वै महोजायसेभ्यः पूर्वो विगास्तथा ॥

* * * *

भूः प्रपद्ये सर्वो वै नमश्च स्वरितो भवेत् ॥
न कश्चन यथोवाच स्वरान्तोपनिषद्भवेत् ।
सर्वे नारायणप्रश्न उच्चान्ता इति निर्णयः ॥

No. 868. आवर्णि.

ĀVARṆI.

Pages, 3. Lines, 6 on a page.

Begins on fol. 95*a* of the MS. described under No. 854.

Complete.

This is a work giving a list of such words from the Yajurvōda as begin with an आ which is merged in the final vowel of the previous word. The work is attributed to Mahādhipati of Tintriṇī (*i. e.* the tamarind tree) Family.

Beginning:

आग्नीध्राग्रयणाज्योपावर्ताप्नोत्यायुधश्रुतिः ।
आशीराहवनीयाग्नेयाग्नामुष्यायणश्रुतिः ॥
आत्मशब्दो नोरसादिरायुश्शब्दो न घात्परः ।
अन्तोदात्तो निहतो वाप्यादित्यश्रुतिरिप्यते ॥

End:

आस्थातास्ताव आहृत्याहावमाहवनस्तथा ॥
अल्पेनाद्याहरन्ति स्यादाहनन्याय चाहलम् ।
आह ऋतुना स्मोपहत्या प्रपराश्राव्यानुवाक्यया ॥
आहुराकारपूर्वश्चेदेषावर्णिस्सुनिर्मितः ।
तिन्त्रिणीकुलसम्भूतमहाधिपतियज्वना ॥

Colophon:

इत्यावर्णिस्समाप्ता ॥

No. **869.** आवर्णि.

ĀVARṆI.

Pages, 6. Lines, 6 on a page.

Begins on fol. 21*b* of the MS. described under No. 853.

Complete.

Same as the last. The line mentioning the author's name is herein omitted.

No. **870.** आवर्णि सव्याख्यान.

ĀVARṆI WITH COMMENTARY.

Pages, 26. Lines, 5 on a page.

Begins on fol. 103*a* of the MS. described under **No.** 861.

Complete. Same as the work described under No. 868, with the commentary in addition.

Beginning:

इतः परं पदादौ वर्तमानस्य आवर्णस्य संग्रहः क्रियते ।
आकारादीनि सर्वाणि विभक्तानि पदान्यहम् ।
आग्नीध्राग्रय, &c., श्रुतिः ॥
आग्नीध्रे आग्रयणे आज्ये उपावर्त आप्नोति आयुधः आकारादीनि । नयवत्याचार्ग्नीध्रे । नमोवृक्तिवत्यर्चाग्नीध्रे जुहुयात् । श्रुतिनिर्देशात् सर्ववि-

भक्तिषाकारादितो भवति । उत्तरेणाग्नीध्रम्। एवमुत्तरत्रापि । श्रुतिश्रुच्छब्द-निर्देशात् यथासम्भवमुदाहार्यः ।

End:

आत्मानं पराह तस्मात्, आश्राव्याह देवान्, पुरोऽनुवाक्ययाह, आहैतत्पूर्वमाहुश्चेत्तेषाम् आवर्णी सुनिर्मितः ॥

Colophon:

आवर्णीव्याख्यानं समाप्तः(म्) ॥

No. 871. आवर्णिव्याख्या.
ĀVARṆIVYĀKHYĀ.

Pages, 8. Lines, 20 on a page.

Complete.

Begins on fol. 20*a* of the MS. described under No. 855.

Beginning:

आकारादीनि सर्वविभक्त्यन्तानि पदान्याह—आग्नीध्रे, अन्तरिक्षमिवाग्नीध्रम्, ऋचाग्नीध्रे जुहुयात् । इध्र इति किम्? दक्षिणाग्नीषोमीयम् ।

End:

देव सवितरेतत्ते प्राह, यद्ब्राह्मणं पराह, आश्राव्याह देवान्, प्रैवैनं पुरोऽनुवाक्ययाह । एतत्पूर्वं किम्? एतावता हैनसा। आहुश्च—यस्य समुद्रं रसया सहाहुः ॥

Colophon:

॥ इत्यावर्णो(र्णि)व्याख्यानं सम्पूर्णम् ॥

No. 872. आवर्णि.
ĀVARṆI.

Pages, 2. Lines, 30 on a page.

Complete.

Begins on fol. 90*a* of the MS. described under No. 859.

This is a work of the same nature as the one described under No. 868 ; it seems to relate to the words of the Ṛg Vēda.

Beginning :

आकृतिश्चाकृतिश्चै(श्चै)व क्षितिमाङ्क्ष चागहि(सि) ।
आम्नीध्रादागमिष्टाग आगमन्नागतेन च ॥
आगत्य स्यादाचरन्त्याचरेदा(रन्ती)च(राज)रदा(आ)जि च ।
इङ्ग्या जुह्वा नागताजदाजित्वात्मादानिङ्ग्यक: ॥

End :

आकारादिपदानान्तु सृष्टाय प्रतिपादितम् ।
यथामति हृदि प्रीत्या धार्यं विद्वज्जनैस्सदा ॥

Colophon :

आवार्णि समाप्तम् ॥

No. 873. अवेष्टनपदानि.

AVĒṢṬANAPADĀNI.

Pages, 6. Lines, 7 on a page.

Begins on fol. 78*a* of the MS. described under No. 856.

Complete.

Words that are not divisible in the Padapāṭha of the Kṛṣṇa-Yajurvēda are herein found arranged alphabetically.

Beginning :

श्रीगणाधिपतये नमः

अजगरेण, अनिष्टृतः,
अरोचथाः, अऽंहतिः ।
अदन्दशूकाः,

End:

सालावृकेभ्यः,
स्नावन्याभ्याम्,
हवामहे,
हरिमाणम्,
हलीक्ष्णान्,

No. 874. उच्चस्वरनिर्णयः.
UCCASVARANIRṆAYAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 39*a* of the MS. described under No. 857.

Complete.

This is a treatise in two chapters on the determination of those Vēdic words which have the Ucca or high accent on the final syllable as well as of those which have it on the initial syllable.

Beginning:

प्रणम्य नारायणपादपङ्कजं
समस्तलोकत्रितयार्तिहारिणम् ।
करिष्यते वेदपदानि पाठतो
निरूप्यतो(चो)च्चस्वरानिर्णयो मया ॥
अन्तोदात्तं पदञ्चेदमाद्युच्चमिदमीदृशम् ।
नियमो न कृतः कैश्चित् कस्मिंश्चित्स्वरलक्षणे ॥
एकादेशोऽयवादेश उदात्तस्संहितागमे ।
ओदेद्लोप्युदात्तो यो विषयो लक्षणस्य सः ॥
अन्तोदात्तं पदं यत्स्यादाद्युदात्तन्तथैव च ।
एतद्द्वयं पदं ज्ञातुमिदं शास्त्रं प्रणीयते ॥
अत्रान्तोच्चस्वरं पूर्वमकारादिक्रमेण तु ।
आद्युच्चश्च ततोऽनेन क्रमेणैव च गृह्यते ॥

नानात्वमिङ्ग्यभूतानां पदानामत्र चेष्यते ।
व्यस्तान्यभिविनिप्रेतान्यन्तोदात्तपदानि च ॥

End:

एति तद्यद्धिरण्येन चैकैकस्मात्तथा भवेत् ।
ओषधिर्बे(र्वौ)षिधीनाश्च तथौषधय ओषधी ॥

इत्याद्युच्चस्वरसमुच्चयः समाप्तः ॥

No. 875. उच्चोदर्कि.

UCCŌDARKI.

Pages, 2. Lines, 6 on a page.

Begins on fol. 34*a* of the MS. described under No. 854.

Complete.

A work on the determination of the two accents, Udātta and Pracaya, they having to be indicated by the fingers of the reciter, each in a peculiar way, when a Svarita accent is followed by an Udātta or Pracaya.

Beginning:

नित्याभिनिहतक्षैप्रपूर्वोदात्तस्य सङ्ग्रहः ।
क्रियते हस्तविन्यासभेदोच्चारणासिद्धये ॥

यदेकस्मिन् पदे स्वारपूर्वोदात्तो न विद्यते ।
संहितालक्षणं तस्मादिदमित्यवगच्छत ॥

उदात्तप्रचयौ भिन्नौ स्थानवाक्स्थानभेदतः ।
अस्मिन् तावेव गोष्ठे ते राष्ट्रे लोके क्षये परः ॥

End:

अस्माकमक्ष्योरस्मद्वा प्राणोऽश्वात्यूर्जमश्विना ।
ज्योतिरन्नाद्यमन्वाग्मन् वै बृहस्पतये जया ॥

Colophon:

इत्युच्चोदर्किः समाप्तः ॥

No. 876. उच्चोदर्कि—सव्याख्यान.

UCCŌDARKI WITH COMMENTARY.

Pages, 9. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 131.

Complete.

The author of the commentary found herein is not known.

Beginning:

नित्याभिनिहतक्षैप्रपूर्वोदात्तस्य सङ्ग्रहः ।
क्रियते हस्तविन्यासभेदोच्चारणसिद्धये ॥

नित्याभिनिहतक्षैप्राः स्वरितविशेषाः यस्मात् पूर्वे उदात्तात्पूर्वभूतातस्य नित्याभिनिहतक्षैप्रपूर्वोदात्तस्य सङ्ग्रहो निश्चयः क्रियते हस्तविन्याससिद्धये भेदोच्चारणसिद्धये च नित्याभिनिहतादिलक्षणं प्रातिशाख्ये द्रष्टव्यम्.

End:

पदेषु स्वारपूर्वो वर्ण उदात्तः । अवरुद्धं१ ह्यस्यान्नम् । अस्येति पदम् निहतमपि अन्नशब्देनैकादशे उदात्तः । सुवर्ग्याण्यासन्, याज्यास्स्युस्तास्सायं, तस्मै होतव्या वर्ष्म वै, आरण्योऽजो नकुलः, सोऽजांऽतिस्रोजा मल्हाः, यस्यातिग्राह्या न, अन्तरिक्ष्यदेवत्यो हि, आयुष्योऽस्माकम्, प्राणोऽक्ष्योश्चक्षुः, तेऽस्मत्पाशान्, द्वे सक्थौ(क्थ्यौ) द्वौ बाहू, प्राणोऽश्नाति स प्राणम् । प्राण इति किम्? अपोऽश्नाति । मनुष्या ऊर्जम्, आनुजावरोऽश्विनौ । ज्योतिरन्नाद्यमन्वाग्मन् वै बृहस्पतये जया ज्योतिः अन्नाद्यमन्वाग्मन् वै बृहस्पतये जया एष्विङ्ग्यानां पदेषु स्वारपूर्वो वर्णः उदात्तः । यथा सुवर्ग्याः, ज्योतिर्गौरायुरिति, तया वै सोऽन्नाद्यम्, त इमेऽन्वाग्मन्, वैश्वदेव्यो वै प्रजाः, पयस्या बृहस्पतये, चतुरक्षरा सत्यजया ॥

Colophon:

इत्युच्चोदर्कव्याख्यानं संपूर्णम् ।

No. 877. उच्चोदर्कि—सव्याख्यान.

UCCŌDARKI WITH COMMENTARY.

Pages, 10. Lines, 6 on a page. Character, Nandināgari

Begins on fol. 17*a* of the MS. described under No. 857.

Complete.

This work is like the last except that the illustrations in the commentary are fuller.

No. 878. उच्चोदर्कि—लघुवृत्तिटीकासहितम्.

UCCŌDARKI WITH A COMMENTARY called LAGHUVṚTTI.

Pages, 13. Lines, 24 on a page.

Begins on fol. 107*b* of the MS. described under No. 867.

Complete.

In this codex the commentary is found after the whole of the text is given. At the end of the commentray a few verses are added, in which the place where the Pracaya-svara occurs is pointed out. After that a few more verses regarding the performance of the annual ceremonies in honor of dead ancestors are also given.

Beginning of the Commentary:

नित्याभिनिहतक्षैप्र इति । अस्यायमर्थः—

नित्याभिनिहतक्षैप्रपूर्वोदात्तस्य सङ्ग्रह इति अनेकदेशेष्वाश्रमभेदात् विप्रकीर्णानामेकत्र सङ्गृह्य पठनसङ्ग्रहः । तत्र नित्यलक्षणं यकारसहितो वकारसहितो वा अनुदात्तपूर्वो वा पूर्वरहितो वा अक्षरं यत्र स्वर्यते स नित्यः यथा—स धन्यस्त्वोताः, ततो बिल्वः ।

End:

नेङ्ग्यांशः—वीर्यं वा अग्निः, पयस्या बृहस्पतये, चतुरक्षरा सत्यजया । इङ्ग्यांशपदेष्वेषूदात्तस्वारात्पराक्षरम्—उदात्तेष्वेतेषु पदेषु नित्यादिस्वाराक्षरमुदात्तं स्यात् कथं भूतेषु ईङ्ग्यैकदेशेष्वित्यर्थः न त्विङ्ग्यपदस्य ॥

Colophon:

उदात्तप्रचयनिर्णयलघुवृत्तिस्समाप्ता ॥

उदात्तात्परतो नास्ति प्रचयः पूर्वतोऽपि वा ।
स्वरितः प्रचयादूर्ध्वं निहतात्प्रचयः परम् ॥
पदादौ प्रचयो नास्ति स्वारादेकपदे ततः ।
नास्त्युदात्तोऽत्त्य(प्य)विज्ञेयो हस्तविन्यासकर्मणि ॥
ओष्ठ्ययोः स्वरयोर्मध्ये संयोगादिर्यदि स्थितः ॥
विसर्गात् क्षपरादूर्द्ध्वमुभयत्रार्द्धमात्रकम् ।
मात्रावर्तानुस्रुविति(?)स्तथा वत्सानुसारिणी ॥
पादोना स्यात्पारवती पादमात्रा पिपीलिका ।
पूर्ववर्णप्रयत्नेन न वदेदुत्तरं बुधः ॥
ओमः पवर्गसंयोगे प्रयत्नो नेप्यते पृथक् ।
नित्याभिनिहतक्षैप्रपूर्वोदात्तस्य सङ्ग्रहः ॥
अविभक्ताः पृथग्ग्रामाः स्वस्वार्जितधनाशनाः ।
प्रतिसां(सं)वत्सरं पित्रोः स्वस्वगेहेषु कारयेत् ॥

*　　　*　　　*　　　*

विवाहोत्सवयज्ञेषु चान्तरे मृतसूतकम् ।
शीतमन्नं परधीयं कर्तृभोक्तृंश्च न स्पृशेत् ॥
आमश्राद्धन्तु पूर्वाह्णे एकोद्दिष्टन्तु मध्यमे ।
पार्वणश्चापराह्णे तु प्रातर्वृद्धिनिमित्तके ॥
संवत्सरश्चोदकुम्भं दर्शश्राद्धानुमासिकम् ।
क्रमेणैव प्रकुर्वीत कुर्यात्तत्रोत्तरोत्तरम् ॥

No. **879.** ऋक्प्रातिशाख्यम्.

ṚKPRĀTIŚĀKHYAM.

Substance, paper. Size, 13¼ × 8 inches. Pages, 36. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains 18 Paṭalas. Begins on fol. 1*a*. The other works herein are Ṛgvēdānukramaṇikā 21*a*, Ṛgvēdaparibhāṣā 46*a*, Kātyāyanasarvānukramaṇikāvṛttiḥ 53*a*, Kālajñānam 135*a*.

At the end of the work under notice there are about two pages of matter on the characteristics of Jaṭā.

The work deals with the orthagraphy, pronunciation and prosody of the Ṛgvēda. The contents of the 18 chapters are given on page 137 of Rājēndralāla Mitra's Catalogue of the Sanskrit MSS. in the Library of His Highness the Maharaja of Bikaner.

Beginning :

परापरे ब्रह्मणि यं सदाहुः
वेदात्मानं वेदनिधिं मुनीन्द्राः ।
तं पद्मगर्भं परमन्त्वादिदेवं
प्रणम्यर्चां लक्षणमाह शौनकः ॥
माण्डूकेयस्संहितां वायुमाह
तथाकाशं चास्य माक्ष(ण्ड)व्य एव ।
समानतामनिले चाम्बरे च
मत्वागस्त्यो विपरं(रि) हारन्तदेव ॥
अध्यात्मकृसौ शूरवीरस्सुताश्च
वाङ्मनसयोर्विपदन्त्यानुपूर्वे(र्व्ये) ।
सन्धेर्विवर्तनं निर्भुजं वदन्ति
शौद्धाक्षरोच्चारणन्तु प्रतृण्णम् ॥
उभये(य)मन्तरेणोभयं व्याप्तमग्रे
वरे कामा अन्ननाकोभयाज्याख्याः ।
प्राणेष्व(णष्ष)कारे यच्च बलं णकारे
वाक्प्राणयोर्यच्च होमः परस्परम् ॥
गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च ।
लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः ॥

स्वरितोदात्तनीचत्वं श्वासो नाद[ा]स्तथोभयम् ।
एतत्सर्वन्तु विज्ञेयं छन्दोभाषावि[धीयता](म)म् ॥
अस्य ज्ञानार्थमिदमुत्तरत्र वक्ष्ये शास्त्रमखिलशैशिरीये ।
ऋग्वेदे पारायणपाठे शाकल्ये शैश(शि)रीयके ॥
पदक्रमविभागज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्राविशेषज्ञो गच्छेदाचार्यसंपदम् ॥

अकारकोराविउएओऐऔपदाद्यन्तयोर्नल्कारस्स्वरेषु ।

End:

लघ्वक्षराणां लघुवृत्तिशब्दं सर्वं
लक्ष्यकं जागतमेव विन्द्यात्
यश्छन्दसा वेदविशेषमेत
भूतानि च त्रैष्टुभजागतानि ।
सर्वाणि रूपाणि च भक्तितो यः
स्वर्गं जयत्येभिरथामृतत्वम् ॥ स्वर्गं जयत्येभिरथामृतत्वमिति ॥

Colophon:

इति प्रातिशाख्ये अष्टादशः पटलः ॥
इति ऋग्वेदप्रातिशाख्यं समाप्तम् ॥

Beginning:

क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् ।
अभ्यस्य पूर्वं च तथोत्तरे पदेऽवसानमेवं च जटा विधीयते ॥

क्रमे यथोक्ते द्वाभ्यामित्यादिनोक्तक्रमेण पदजातं पदद्वयं पदत्रयं वा उच्चार्य पूर्वमादौ उत्तरमवसानपरं द्विरभ्यसेत् द्विवारं पठेत् अभ्यस्य ततस्सन्धानद्वारा पूर्वं प्रथमं पदं विलोमतयोच्चार्य द्विरभ्यसेत् । ततः क्रमवदुक्त्वा कुर्यादवसानम् ॥

End:

पदसन्धानाद्विशेषितस्य स्वरस्याभिधाने ज्ञाने च
स्वरं(रो)विधेया(यो)हि यथाश्रुतैस्स्वरैः
परे(दे)ष्वथामन्त्रितजातकेष्विह ।

अत्र जटापठने पदेषु यथाश्रुतैस्स्वरैरुदात्तवदेकीभावमित्याद्युक्तक्रमेव स्वरसन्धानं कर्तव्यम् । पद . . .

No. 880. ऋक्प्रातिशाख्यम्.

ṚKPRĀTIŚĀKHYAM.

Substance, paper. Size, 13 × 8¼ inches. Pages, 35. Lines, 27 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains 18 Paṭalas.

Begins on fol. 1*a*. A commentary relating to this work begins on fol. 23*a* of this codex.

Complete.

Same as the last.

No. 881. ऋक्प्रातिशाख्यम्.

ṚKPRĀTIŚĀKHYAM.

Substance, palm-leaf. Size, 12¾ × 1⅝ inches. Pages, 59. Lines, 7 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Breaks off in the 17th Paṭala; but it is erroneously stated in the colophon on fol. 29*b*, wrongly introduced there, that all the 18 Paṭalas are complete.

Begins on fol. 1*a*. The other works herein are Ṛṣidēvatāchandōnāman 31*a*. Vāyustutivyākhyānam 180*a* Pañcasaṁskāraviṣayasaṅgrahaḥ 207*a* and Pādmatantram 221*a*.

Same as the last.

No. 882. ऋक्प्रातिशाख्यव्याख्या.

ṚKPRĀTIŚĀKHYAVYĀKHYĀ.

Pages, 201. Lines, 27 on a page.

Begins on fol. 23*a* of the MS. described under No. 880.

Complete.

This commentary is said to have been composed by Uvaṭa and is called Pārṣadavṛtti.

A few specially added stanzas at the end describe the Mātrā, Prayatna and the Svara of the Praṇava, and also mention the merit flowing from knowing and using it well.

Beginning:

संहिता पद(प्र)कृतिः। पदान्तान्पदादितस्सह सन्दधीतेति यत्सा कालाव्यवायेन, पदानि प्रकृतिः यस्याः संहितायाः सेयं पदप्रकृतिस्संहिता सा सन्धिकृता वेदितव्या । न पदानीह शास्त्रे साध्यन्ते ऐन्द्रव्याकरणादितः प्रकृतानि पदानि तस्मादन्यत्र सिद्धानां पदानां विधिरुच्यते इत्यर्थः । का पुनस्संहिता? पदान्तान् पदादितः सह सन्दधीतेति यत्सा कालाव्यवायेन सा संहिता। अयं देवाय जन्मने । संहिता संज्ञायाः प्रयोजनम् . . .

इति शौनकीये प्रातिशाख्ये श्रीपार्षदवृत्तौ संहितापटलं द्वितीयम् ।

End:

गायत्र्यादीनि छन्दांसि सोम आहुतयः पुरा।
भान्ति सर्वमिदं कृत्स्नं त्रैलोक्यं सचराचरम् ॥
धन्यं यशस्यमायुष्यं पुण्यं पुष्टिकरं शुभम् ।
आत्यन्तिकं चापवर्गं छन्दसां ज्ञानमुत्तमम् ॥
छन्दोज्ञानात्परं ज्ञानं नान्यदस्तीति मे मतिः ।
आहुर्यस्माद्द्विजश्रेष्ठाः तस्माद्विद्यात् प्रयत्नतः ॥

इति शौनकीय ऋग्वेदप्रातिशाख्यपार्षदवृत्तौ प्रागाथं छन्दः पटलं नामाष्टादशम् ।

Colophon:

इति श्रीशौनकीयप्रातिशाख्ये तृतीयाध्यायस्य बार्हतः प्रगाथादि छन्दः पटलं नाम षष्ठम् ॥ तृतीयाध्यायस्समाप्तः ॥

सार्धा चतुस्सहस्री च चतुष्षष्ठ्याधिका तथा ।
व्याख्याने प्रातिशाख्यस्य ग्रन्थसङ्ख्येयति विद्यते ॥
चतुर्मात्रश्च षण्मात्रः प्रणवः कीर्त्यते बुधैः ।
पूर्वस्स्वरः परो नादः समीमात्रः प्रकीर्तितः ॥
अनुदात्तस्वरो ज्ञेय उदात्तो नाद उच्यते ।
लक्षणं प्रणवस्येदं प्रणवो ब्रह्म कीर्त्यते ॥
तैलधारमिवाच्छिन्नं दीर्घं घण्टानिनादवत् ।
अवाच्यं प्रणवस्याग्रं यस्तं वेद स वेदवित् ॥
त्रिस्थानं च त्रिमात्रं च त्रिब्रह्म च त्र्यक्षरम् ।
त्रिमात्रादर्धमात्रन्तु यस्तं वेद स वेदवित् ॥
वेदो हि वर्णसङ्घातो वेदो ब्रह्मेति कीर्त्यते ।
तस्मात्तद्वेदवर्णज्ञो ब्रह्मलोके महीयते ॥
अनेन विधिना वेदं योऽधीते श्रद्धयान्वितः ।
सर्वपापविनिर्मुक्तो ब्रह्मलोके महीयते ॥

एतत् पवित्रं पापघ्नं वाङ्मलस्य विशोधनम् ।
भक्त्या ज्ञात्वा च सङ्गृह्य ब्रह्मलोके महीयते ॥ नमश्शौनकाय नमः ॥
अज्ञानमोहाद्यदि विभ्रमाद्वा यत् किञ्चिदूनं लिखितं मयेह ।
तत् सर्वमार्यं परिशोधनीयं न दोष आर्याः खलु लेखकस्य ॥

No. **883.** **ऋक्प्रातिशाख्यवृत्तिव्याख्या.**

ṚKPRĀTIŚĀKHYAVṚTTIVYĀKHYĀ.

Substance, palm-leaf. **Size,** 15 × 1⅝ inches. **Pages,** 178. **Lines,** 6 on a page. **Character,** Telugu. **Condition,** good. **Appearance,** not old.

Incomplete. Paṭalas 1 to 6 complete.

A gloss on Uvaṭa's commentary on the Ṛkprātiśākhya; by Viṣṇumitra, son of Vēdamitra, a resident of the Campā country.

Beginning:

अत्र भाष्यकृतस्सर्वान् प्रणम्य शिरसा मुनीन् ।
शौनकन्तु विशेषेण येनेदं पार्षदं कृतम् ॥
तस्य वृत्तिः कृता येन तं सत्ययशसं तदा ।
तेषां प्रसादादेवास्य स्वशक्त्या वृत्तिमारभे ॥
लेख्यदोषनिवृत्त्यर्थं विस्तारार्थं क्वचित्क्वचित् ।
बह्वुदाहरणार्थाय योज्यते सा मया पुनः ॥
तस्यास्समापने शक्तिं त एव प्रदिशन्तु मे ।
लब्ध्वा काममहं तेभ्यो गच्छेयं पारमीप्सितम् ॥
चम्पायां न्यवसत्पूर्वं वत्सानां कुलमृद्धिमत् ।
तस्मिन् द्विज(व)रा जाता बह्वृचाः पारगोत्तमाः ॥
वेदमित्र इति ख्यातस्तस्मिन् जातो महायशाः ।
चर्चापाठेऽखिलश्रेष्ठः सुतस्तस्य महात्मनः ॥
नाम्ना वै विष्णुमित्रस्तु कुमार इति शब्द्यते ।
तेनेयं योजिता वृत्तिरुदाहरणमण्डिता ॥
पण्डिताः परिगृह्णन्तु सुप्रसन्नामिमां मम ।
अज्ञानाद्यदुपात्तं स्यात्तदृजूकृत्य योज्यताम् ॥
शास्त्रावतारं संबन्धं ज्ञात्वादौ च प्रयोजनम् ।
सुखबोध्यं भवेच्छास्त्रमिति शिष्टानुशासनम् ॥
शौनको वै गृहपतिः नैमिशीयैस्तु दीक्षितैः ।
दीक्षान्ते चोदितस्त्वाह सात्रीये द्वादशाब्दिके ॥

इति शास्त्रावतारं स्मरन्ति । अथ संबन्ध मु(उ)च्यते—अयं द्विजातीनां वेदाभ्यासः सकलपुरुषार्थसिद्धेः कारणमिति वैदिकसिद्धान्तः । स च पुरु-

षार्थश्चतुर्विधः—धर्मोऽर्थः कामो मोक्षश्चेति । तदप्युक्तमृग्विधाने पवमाने नाभानेदिष्ठहृद्येषु पुरुषसूक्तादिषु । वेदाभ्यासो हि पञ्चधा विहितः—अध्ययनं विचारोऽभ्यसनं जपोऽध्यापनमिति । तथा च स्मर्यते—

वेदस्वीकरणं पूर्वं विचारोऽभ्यसनञ्जपः ।
तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥ इति

तदपि वक्ष्यति—एकः श्रोता दक्षिणतो निषीदतीत्यध्ययनम्; अभ्यासार्थे द(द्रु)तां वृत्तिमित्यभ्यसनम्; प्रयोगार्थे तु मध्यमामिति जपादिः; तद्दानञ्चैव शिष्येभ्य इत्यध्यापनम्; पारायणं वर्तये(त्)ब्रह्मचारीत्येवमादि च । तस्मादधीतवेदस्य सति सामर्थ्ये सम्पूर्णफलापेक्षया विचारः प्राप्तः स विचारो द्विविधः अर्थतो लक्षणतश्चेति । तथा चोक्तम्—

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते (स) नाकमेति ज्ञानविधूतपाप्मेति ॥

तथा च

लक्षणं यो न वेत्त्यृक्षु न स कर्मफलं लभेत् ।
लक्षणज्ञो हि मन्त्राणां सकलं भद्रमश्नुते ॥

इति तस्मात्तावत्पूर्वं लक्षणमुच्यते लक्षणपूर्वकं हि अर्थपरिज्ञानम् । तथा चोक्तम्—

स्वरो वर्णोऽक्षरं मन्त्रास्तत्प्रयोगार्थ एव च ।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ॥ इति ।

सर्वशास्त्रादौ नमस्कारं कुर्वन्त्याचार्या यथा स्वयंभुवे ब्रह्मणे विश्वगोप्त्र इति, सर्वात्मानं विश्वसृजं स्वयम्भुवमिति च । पितृदेवऋषिसङ्घेभ्य इति । अतोऽत्रापि शौनक आचार्यो भगवान् शास्त्रादौ नमस्कारं प्रतिज्ञाश्च (च)काराविघ्नार्थम्—

परापु(व)रे ब्रह्मणि यं सदाहुः
वेदात्मानं वेदनिधिं मुनीन्द्राः ।
तं पद्मगर्भं परमन्त्वादिदेवं
प्रणम्यर्चो लक्षणमाह शौनकः ॥

परश्चावरश्च परावरं परं नाम मनसा ध्यानगम्यं सदसदात्मकं वेदान्तेषु यदुच्यते तदेतद्धृदयं मन(श्चे)त्यादि तथा च महापुरुष इति यमवोचामेत्यादि । तथा अयं ज्योतिरजरं ब्रह्म । स ब्रह्मामृतं सदसदात्मकमिति । महश्च अणु च विश्वेशं विंशतिज्योतिरुत्तममिति च ।

* * * *

ख्यातौ खकारयकारौ एके । ख्यातेर्धातोः खकारय(श)कारयोस्स्थाने खकारयकारौ वक्तव्यौ मन्यन्ते एके आचार्याः । अख्यद्देवः । तावेव ख्यातिसदृशेषु नामसु । तावेव खकारयकारौ ख्यातिसदृशेषु नामसु वक्तव्यौ मन्यन्ते एके आचार्याः । सख्ये सखायः ॥

Colophon:

इति पार्षदव्याख्यायां द्विर्वचनपटलष्षष्ठः संपूर्णः ॥

End:

आहत्य एकत्रिंशत् । पादादाविति किम्? द्यावा नो अद्य पृथिवी । नू चिद्दधिष्व मे गिरः । अत्रैव वोऽपि नह्यामि । न्वेववर्जं न संयोगे । नु एव इत्येते पदे वर्जयित्वा यच्छतं तत्संयोगे परे न प्लवते । अद्य त्वा वन्वंत्सुरेकूणाः, पुरु त्वा दाश्वान्, अथ त्वमिन्द्र, पिबस्व धेनवानाम् । न्वेववर्जमिति कस्मात् ॥

No. 884. ऋग्विधानम् शौनकीयम्.

ṚGVIDHĀNAM, ŚAUNAKĪYAM.

Substance, palm-leaf. Size, 14¼ × 1½ inches. Pages, 293. Lines, 7 on a page. Character, Nandināgarí. Condition, good. Appearance, new.

Incomplete. Breaks off in the 18th Adhyāya.

The ऋषि, छन्दस्, देवता and the application and माहात्म्य of each Sûkta of the ten Maṇḍalas are given in order in this work. Just at the point where this Anukramaṇikā should end, there is ग्रन्थपात. Then begins रोगशान्ति, which consists of certain ceremonies for the removal of various diseases personified as cruel and harmful beings. This portion is called उत्तरकल्प which in this codex, contains two chapters in full and only the beginning of the third chapter. These appear to be appendices added to the main work.

Beginning:

शौनक उवाच

नियतं न हि वेदानां मन्त्राणां कलिदोषतः ।
कलिदोषनिवृत्त्यर्थं गायत्रीं पूजयेद्द्विजः ॥
गायत्रीमन्त्रसिध्यर्थं गायत्रीमयुतं जपेत् ।
सर्वेषां वेदमन्त्राणां सिध्यर्थं लक्षकं ततः ॥
गायत्रीमन्त्रसिध्यर्थं सप्तव्याहृतिसम्पुटम् ।
अयुतं चेज्जपेत्पूर्वं गायत्री सिद्धिदा तदा ॥

* * * *

अग्निमीळे नवमधुच्छन्दा(न्दो) ऋषिः, गायत्री छन्दः, अग्निर्देवता ।
अग्निमीळे जपेत्सूक्तं पापघ्नं श्रीकरं च यत् ।
पारायणफलं तस्य वेदानां चैव तत्सदा ॥
आग्नेयमाद्यसूक्तं तु मुख्यं ब्रह्मर्षिसम्मतम् ।
रायस्पोषकरं धन्यं जपन् विप्रोऽर्थमाप्नुयात् ॥
ऋषिस्सर्वमिदं जप्त्वा स पूतो नियतश्शुचिः ।
संहिताफलमाप्नोति ऋग्वेदस्य न संशयः ॥
एकादशगुणं ह्येतज्जपन् ब्रह्म सनातनम् ।
सर्वान् कामानवाप्नोति पापेभ्यश्च प्रमुच्यते ॥

* * * *

Colophon:

इति शौनकीयऋग्विधाने अष्टमाष्टके सप्तमोऽध्यायस्समाप्तः ॥

* * * *

End:

कुर्वीत वास्तुशमनं मध्ये गोष्ठस्य धर्मवित् ।
पुण्यैर्गन्धैश्च माल्यैश्च वानस्पत्यैस्तदौषधैः ॥
वास्तु सर्वं प्रतिशिरे सर्वधान्यैस्तथैव च ।
. . . . जपेच्छा(१)त्वं पायसेन यथाविधि ॥
औदुम्बरपलाशैस्तु बलिं प्रतिदिनं यथा ।

* * * *

एवमादि नरो ज्ञात्वा रोगोपद्रवशान्तये ।
जपहोमादिकर्तव्यं पूर्वमुक्तविधानतः ॥
क्षुद्रेष्वनुक्तरोगेषु सङ्करीकरणाद्विना ।
स्वरूपमेवं जानीयात् सर्वशान्तिषु कर्मसु ॥

* * * *

विकीर्णकेशी रोगाणां प्रतिरूपं प्रकल्पयेत् ॥
इति शौनकीयऋग्विधान उत्तरकल्पः ॥

Beginning:

अथ द्वितीयः । ऋषय ऊचुः
शृण्वन्तु ऋषयस्सर्वे गुह्याद्गुह्यतमं महत् ।
दशश्लोक्यमिदं स्तोत्रं वदामि ध्यानपूर्वकम् ॥
अङ्कुशं चाक्षसूत्रं च पाशपुस्तकधारिणीम् ।
मुक्ताहारसमायुक्तां देवीं ध्यायेच्चतुर्भुजाम् ॥

End:

प्रथमं भारती नाम द्वितीयं च महेश्वरी ।
तृतीयं शारदा देवी चतुर्थं कंसमर्दिनी ॥

पञ्चमं च जगन्माता षष्ठं चैव तु पार्वती ।
सप्तमं चैव कामाक्षी अष्टमं ब्रह्मपुत्रिका ॥
नवमं चैव वाराही दशमं ब्रह्मचारिणी ।
एकादशं तु वाग्वाणी द्वादशं वरदाम्बिका ॥

Colophon:

इति शौनकीयऋग्विधाने उत्तरकल्पे द्वितीयस्समाप्तः ।
अथ शिष्टरोगमूर्तिलक्षणम् । त्रिदोषशूलस्वरूपम् ।
त्रिदोषशूलरोगस्स्यात् दशहस्तः खराननः ।
त्रिलोचनश्शक्तिशूलपाशखड्गाङ्क(ड्वाङ्ग)शस्त्रभृत् ॥
त्रिशूलत्रितयैर्मर्त्यान् आपात्य क्षतयन् हृदि ।
नासानिहिततर्जन्या मोहयन् पारिपार्श्वकान् ॥

End:

पानात्पयःप्रभूताङ्गः पाण्डुरायतविग्रहः ।
चक्राङ्कुशखरः क्रूरः कुटिलेक्षणलालसः ॥

No. 885. ऋग्वेदलक्षणम्.

ṚGVĒDALAKṢAṆAM.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 20. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Begins on fol. 3*a*. The other works contained in the MS. are Vaiśvadēvavidhiḥ 1*a*, Vikṛtivalli 13*a*.

This is a work on the various kinds of Pādas or metrical lines found in the 8 Aṣṭakas of the Ṛgvēda.

Beginning:

देवा वै प्रथमेनाह्नेन्द्राय वज्रं समभरंस्तं द्वितीयेनाह्नासिञ्चंस्तृतीयेनाह्नाप्या
ऋतेन मित्रावरुणादस्त्रायुवाकवस्सुताः ब्रह्म च वरुणश्श्रुधि । अथ द्वादशेन

पादः त्वन्नो अग्ने पित्रोरुपस्थ आराय स्पूर्धि स्वधा वोऽस्ति हिते । अत्राह तत्कण्व एषां कण्वतमः ।

End:

आपो दीर्घं विश्वजिते अरिष्टिमा नो ब्रह्मण्यरिष्टं तातूत इन्द्रवधेन दस्युमिन्वकरां वावशाना ग्रावाणा वावृधाना आन्यूनमयं वां यन्नासत्याय द्वां कक्षीवानुभे भद्रे उदिरः ।

No. 886. ऋग्वेदपरिभाषा.
ṚGVEDAPARIBHĀṢĀ.

Pages, 11. Lines, 20 on a page.

Begins on fol. 46*a* of the MS. described under No. 879.

Incomplete.

This work mentions the number of stanzas, and the names of the Ṛṣi, Dēvata and Chandas, in relation to every hymn in the Ṛgvēda.

Beginning:

अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीके ऋक्सङ्ख्याऋषिदैवतछन्दांस्यनुक्रमिष्यामः यथोपदेशं न ह्येतज्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिर्मन्त्राणां ब्राह्मणार्षेयछन्दोदैवतविज्ञानाध्यापनाभ्याम् । स श्रेयोऽधिगच्छति

End:

आदौ पञ्चाक्षरौ पादौ तृतीयसप्ताक्षरश्चतुर्थो नवाक्षरस्सप्तम्याः पञ्चको मुख्योदित इत्यर्थः ।

तृतीयस्सप्तको नवकश्चे ऋक्कृतं चिद्धिष्म ४ ५ ५ ७ ९ । अष्टम्याः पञ्चकपादश्चतुष्कसप्तकस्त्रैष्टुभश्च शिवा न सङ्ख्येति । ऋक् ५ ४ ७ ११

No. 887. ऋग्वेदपरिभाषा.
ṚGVĒDAPARIBHĀṢĀ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 6. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Begins on fol. 3*a*. The other works herein are —Vēdāṅgajyautiṣam 10*a*, Chandas 6*a*, Ṛgvēdānukramaṇikā 10*a*, Saptasvaram 35*a*.

Beginning: Same as above.

End:

ब्रह्मजाया जुहूर्नाम अगस्त्यस्य स्वसा दितिः ।
इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी ॥
लोपामुद्रा च नद्यश्च यमी नारी च शश्वती ॥
श्रीर्लाक्षा सार्पराज्ञीव श्रद्धा मेधा च दक्षिणा ।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः ॥

The date of copying is given in Telugu as follows:—

Copied by Kṛṣṇa on the 15th of Kārtika, Thursday in the year Siddhārti.

No. 888. ऋग्वेदपरिभाषा.

ṚGVĒDAPARIBHĀṢĀ.

Substance, palm-leaf. Size, 12×1¼ inches. Pages, 43. Lines, 7 on a page. Character, Kanarese. Condition, good. Appearance, old.

Incomplete.

Begins on fol. 14*a*. The other works contained in the codex are Śikṣāśāstram 1*a*, Vēdacchandas 4*a*, Kālajñānam 8*b*, Śamānam 10*b*, Vilinghyam 36*a*.

Same as the last.

After the 31st fol. in the work under notice, there are four leaves, numbered as 19 to 22, which do not continue consecutively the work. However, they also treat of the same subject.

Beginning:

ऋग्वेदाम्नाये शाकलके सूक्तप्रतीके ऋक्संख्याऋषिदैवतछन्दांस्यनुक्रमिष्यामः—यथोपदेशं न ह्येतद्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिर्मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतविद्याजनाध्यापनाभ्याम् । स श्रेयोऽधिगच्छत्येताभ्यामेव । अनेवंविदो यातयामानि च्छन्दांसि भवन्ति । स्थाणुं वर्छति गर्ते वा पात्यते प्रमीयते वा पापीयान् भवतीति विज्ञायते

End:

सौपर्णी नवमी वज्रसंस्तुतिरयमिति । द्यृचेनेन्द्र आत्मानमस्तौदुपान्त्ये वाच्योधक्षोल(ऽथ षोड)श जमदग्निर्भार्गवो मैत्रावरुणं प्रागाधं त्रिविष्टुबन्तं तृतीया गायत्र्या परासतो बृहतिस्तोत्रं राजसुक् सपादादित्याश्विन्यौ वायव्ये सौर्यौ ॥

No 889. ऋग्वेदानुक्रमणिका.

ṚGVĒDĀNUKRAMAṆIKĀ.

Pages, 45. Lines, 20 on a page.

Begins on fol. 21*a* of the MS. described under No 879.

Complete.

A work, similar to the last, but by a different author.

Beginning:

अग्निं नवमधुच्छन्दो वैश्वामित्रा वायो वायव्यैन्द्रवायवमैत्रावरुणास्तृचाश्विना द्वादश । अश्विनैन्द्रवैश्वदेवसारस्वतास्तृचास्सप्तैताः प्रउगदेवताः सुरूपकृत्नुं दशैन्द्रमा तु युजन्त्या दहेत्येताः

End:

तदेतत्सूक्तसहस्रं ससप्तदशकं सपादाधिकम् । वर्गाणां द्वे सहस्रे चतुर्विंशोत्तरे । ऋचां दशसहस्राण्यृचां [दशसहस्राणि ऋचां] पञ्चशतानि च ऋचामशीतिः । पादश्च पारायणं स प्रकीर्तितम् । शाकल्यदृष्टे पदलक्षमेकं सार्द्धं

तथा त्रिसहस्रयुक्तम् अष्टौ शतानि षड्विंशतिः पदसङ्ख्या प्रकीर्तिता । ऋग्वेदपारायणपाठे शाकल्ये शैशिरीयके नमश्शौनकाय नमः परमऋषिभ्यः ॥

* * * *

सूक्तमध्ये योऽवसाने भ्रष्टवीर्यस्स पापकृत् ।
गतासुर्मुनिहन्ता च रौरवं नरकं व्रजेत् ॥
अविदित्वा ऋषिच्छन्दोदैवतं योगमेव च ।
योऽध्यापयेज्जपेद्यस्तु पापीयान् जायते सुतः ॥
एकैकस्य ऋषेर्ज्ञानात् सहस्रायुर्भवेद्विजः ।
छन्दसामपि सालोक्यं छन्दोज्ञानादवाप्र(प्नु)यात् ॥

No. 890. ऋग्वेदानुक्रमणिका.

ṚGVEDĀNUKRAMAṆIKĀ.

Pages, 148. Lines, 6 on a page.

Begins on fol. *10a.* of the MS. described under No. 887.

Complete.

The copying is said in the end to have been completed on Tuesday, the 11th, of the bright fortnight of Pramādi year; and the copyist's name is said to be Śrī Rāmasētu, a resident of Garakubākapura.

At the end of the work the characteristics of the various modes of Udātta-svara are mentioned in a few verses.

No. 891. कालनिर्णयशिक्षा.

KĀLANIRṆAYAŚIKṢĀ.

Pages, 4. Lines, 19 on a page.

Begins on fol. *45a* of the MS. described under No. 864.

Complete.

This work treats of the Mātrā, or prosodial time-measure of letters, and of accents and stops.

Beginning:

प्रातिशाख्यादिशास्त्राणि मया वीक्ष्य यथामति ।
वेदतत्त्वावबोधार्थमिह कालो निरूप्यते ॥
अखण्डवर्णविषयो वर्णांशविषयोऽपि च ।
विरामविषयश्चेति त्रिविधः काल उच्यते ॥
स्वरवर्णविरामाणां भिन्नवाग्वृत्तिवर्त्तिनाम् ।
ऐकरूप्येण कालस्य कथनन्नोपपद्यते ॥
मध्यमां वृत्तिमाश्रित्य मया चेयं कृतिः कृता ।
प्रातिशाख्ये निषिध्यान्या यस्मात्सैकैव बोध्यते ॥

End:

परेण नित्यसंबन्धं प्रादिं परपदन्तथा ।
एकस्वराणां चादीनां प्रादीनामिति तद्द्वयम् ॥
यो यो विरामकालः प्रागृगादौ समुदीरितः ।
अङ्गीकृतस्यार्द्धमात्रं तु न सोऽधिक इष्यते ॥

Colophon:

कालनिर्णयशिक्षा सम्पूर्णा ॥

No. 892. कालनिर्णयशिक्षा सव्याख्या.

KĀLANIRṆAYAŚIKṢĀ WITH COMMENTARY.

Pages, 13. Lines, 22 on a page.

Begins on fol. 100*b* of the MS. described under No. 867.
Complete.

This commentary is by Muktīśvarācārya on the Śikṣā noticed above.

Beginning:

प्रातिशाख्यादिशास्त्राणि मया वीक्ष्य यथामति ।
वेदतत्त्वावबोधार्थमिह कालो निरूप्यते ॥

श्रोतृबुद्धिमनस्समाधानार्थं प्रकरणे प्रतिपाद्यमर्थं दर्शयति इह कालो निरूप्यत इति। अनेन विषयो दर्शितः। निष्प्रयोजने प्रकरणे प्रेक्षावत्प्रवृत्त्यनुपपत्तेस्तत्सिद्ध्यर्थं स्वग्रन्थस्य प्रयोजनं दर्शयति वेदतत्त्वावबोधार्थमिति। वेदस्य तत्त्वस्यावबोधः वेदतत्त्वावबोधः तदर्थं वेदतत्त्वावबोधार्थम्। अनेनार्थज्ञानकामिनोऽधिकारो दर्शितः। स्वग्रन्थस्य मूलन्दर्शयति प्रातिशाख्यादिशास्त्राणीति। प्रतिशाखासंबन्धि प्रातिशाख्यम्

End:

एक एव स्वरो येषां ते एकस्वराः तेषां पदानां योऽयं चादेः पूर्वपदान्तवद्भावः प्रादेः परपदादिवद्भावश्चोक्तः तदुभयं चादीनां प्रादीनामेकस्वरत्व एव भवति। बहुस्वरत्वे

प्रपरापसमन्ववनिर्दुर्व्याङ्न्यध्यप्यतिसूदभयश्च।
प्रतिना सह लक्षयितव्याः पर्युपयोरपि लक्षणमत्र॥
इति प्रादयो विंशतिः चादयोऽनन्ताः॥

Colophon:

इति श्रीमुक्तीश्वराचार्यकृतौ कालनिर्णयदीपिका समाप्ता॥

Beginning:

आदावनुक्ते स्ववति परस्ताच्च विशीर्यते।
तस्मात्समुच्चरेद्ब्रह्म रक्षायै छन्दसां स्फुटम्॥
ग्रामे मध्यन्दिने चैव तस्य कतिधा भवेत्।
एकं द्वे पञ्चकं त्वेकमवसान इति क्रमात्॥
वेदेन सह यद्वाक्यमुदात्तान्तं प्रकीर्तितम्।
यत्र भिन्नत्वमाप्नोति स्वरितं चाधिगच्छति॥

End:

प्र, परा, अप, सम्, अनु, अव, निः, दुः, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप, एते प्रादयो विंशतिः। चादयोऽनन्ता इति॥

No. 893. कौहलीयशिक्षा.

KAUHALĪYAŚIKṢĀ.

Pages, 12. Lines, 17 on a page.

Begins on fol. 49*a* of the MS. described under No. 864.

Complete.

A work on the characteristics of Vēdic accents as propounded by Kauhala.

Beginning:

अथ शीक्षां प्रवक्ष्यामि कौहलीयमतानुगाम् ।
स्वरादिनिर्णयस्तत्र क्रियते तन्निबोधत ॥
उदा(त्ता)श्चानुदात्ताश्च स्वरितः प्रचयस्तथा ।
इंति चत्वार भागे हि(एवेह) स्वरां: प्रोक्ता मनीषिभिः ॥
उच्चैरुच्चार्यते यस्तु स उदात्त उदाहृतः ।
आयामे दृढता सौक्ष्म्यं गात्रेङ्गचेषु तथा गले ॥
उच्चत्वकारकानेतानाहुः प्रज्ञा विशेषतः ।
नीचैरुच्चार्यते यस्तु सोऽनुदात्तोऽभिधीयते ॥
प्रसृता मृदुता स्थौल्यं गात्रादेः कारकं विदुः ।
नीचत्वे स्वरितः प्रोक्तः तयाः(दा) सत्वान इष्यते ॥

End:

औष्मस्वरान्ते चाप्येवं निपुणन्तन्निबोधत ।
अत्र यो विद्यते यस्य तद्विदां प्रय . . ॥
शास्त्रमेतत्त . सव्य ऋषिरस्य प्रसीदति ।
शिक्षामिमान्तु योऽधीते वेदतत्त्वप्रकाशिकाम् ।
अतुलामश्नुते कीर्तिं परे(रत्रेह च शाश्वतीम्) ॥

Colophon:

कौहलीयशिक्षामूलं समासम् ॥

No. 894. गायत्रीगानलक्षणम्.

GĀYATRĪGĀNALAKṢAṆAM.

Substance, palm-leaf. Size, 17⅜ × 1⅜ inches. Pages, 13. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 68*a*. The other work herein is Sāmatantrasūtrabhāṣyam 1*a*.

Incomplete; contains Prapāṭhakas 1 & 2 in the Saṁjñāprakaraṇa.

This work explains how the Gāyatrī-prayer has to be chanted when forming part of the Sāmavēda.

Beginning:

सावित्र्यां गायत्रीगानं देवताध्याय उक्तम् । तथा च ब्राह्मणं भवति—अथातो गायत्रमाग्नेयं भक्त्या भवतीति देवानां वा ऋषीणां वा परमेष्ठिनो वा प्राजापत्यस्य साम सावित्रीगेयं यत्रागीतं तत्सवितुर्वरेणियोमिति ।

End:

य(अ)थो एतद्धुतः प्रहुत आहुतश्शूलगवो बलिहरणं प्रत्यवरोहणमष्टकाहोम इति सप्त पाकयज्ञसंस्था इति । ता अनुव्याख्यास्यामः—तत्र यद्धूयते स हुतो यथैतद्विवाहस्सीमन्तोन्नयनश्चेति तत्र हि हूयत एव । अथ यद्धुत्वा दीयते स प्रहुतो यथैतदुपनयनं समावर्तनश्चेति तत्र हि हुत्वा दीयत एव । अथ यद्धुत्वा दत्वा चादीयते स आहुतो यथैतदुपनयनं समावर्तनं चेति तत्र हि हुत्वा दत्वादीयते । अथ यच्छूलेषूपनक्ष्य गव्यानि श्रपयन्ति स शूलगवः ।

End:

अथ यदि होमकालेषु, अथातस्सप्तपाकयज्ञानां प्रायश्चित्तम्, अथातः प्रायश्चित्तानि, अथ विपरीतदर्भास्तरणम्, अथ गर्भाधानपुंसवनम्, अथ पाकयज्ञानां प्रायश्चित्तिः, अथाभ्याघातः . . . . . अथातस्सप्तपाकयज्ञानां यथर्तुसंवेशनादि, अथातस्सप्तपाकयज्ञानां द्वादश ॥

Colophon:

इति चतुर्थः प्रश्नः ॥

No. 1175. बोधायनगृह्यतच्छेषः.

BŌDHĀYANAGṚHYATACCHEṢAḤ.

Pages, 5. Lines, 37 on a page. Character, Grantha. Copied in 1898.

Begins on fol. 35*a* of the MS. described under No. 1174. Contains Khaṇḍas 5 to 10.

A supplement to the work described under the last number.

Beginning :

अथातस्सिकतादोषं व्याख्यास्यामो भस्मकेशतुषकपालशर्करातृणास्थि-पिपीलि(ल)कैरार्द्रसि(सै)कतानि वर्जयेत् । भस्मना यजमानक्षयः,केशेन स्त्रीमरणं, तुषेण पुत्रनाशः, कपालैरर्थनाशः, शर्करै(राभि)र्बन्धुवियोगः, तृणेन कर्मक्षयः, अस्थिना(स्था) ग्रामविनाशः, पिपीलि(ल)कैराष्ट्रविनाशः, आर्द्रसि(सै)कतैर्व्याधिभयं भवतीत्याह भगवान् बोधायनः ।

End :

ईश्वरं भास्करं विद्यात् स्कन्दमङ्गारकं तथा ॥
शुक्रं शचीपतिं विद्यादुमां चैव निशाकरम् ।
बुधं नारायणं विद्यात् ब्रह्माणं च बृहस्पतिम् ॥
यमं शनैश्चरं विद्यादेवं देवा यथा ग्रहाः ।
देवता ग्रहरूपेण दर्शयन्ति शुभाशुभम् ॥

इत्याह भगवान् बोधायनः ॥

No. 1176. वैखानसगृह्यसूत्रम्.

VAIKHĀNASAGṚHYASŪTRAM.

Substance, paper. Size, 8 × 6½ inches. Pages, 205. Lines, 12 on a page. Character, Telugu. Condition, good. Appearance, new. Transcribed for the Library in 1891.

Begins on fol. 1*a*. The other works herein are Vaikhānasadharmasūtram 103*a*, and Vaikhānasapravarasūtram 135*a*.

Contains 7 Praśnas.

Refer to pages 6 and 155 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS. for the year 1893-94, No. 2, for remarks and extracts.

No. 1177. वैखानसप्रवरसूत्रम्.

VAIKHĀNASAPRAVARASŪTRAM.

Pages, 13. Lines, 12 on a page.

Begins on fol. 135*a* of the MS. described under No. 1176.

Transcribed for the Library in 1894.

Vide the reference given under the last number.

No. 1178. शाठ्यायनसूत्रम्.

ŚĀṬHYAYANASŪTRAM.

Substance, palm-leaf. Size, $13\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 15. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, not old.

This treats of the expiatory rites to be performed in relation to the various Gṛhya ceremonies.

Beginning:

अथातो गृह्यप्रायश्चित्तानि स्मर्यन्ते । तानि वक्ष्यामः—शेषानि वैतानिकानि स्युः होमदेवतयोस्समानाम्नातात्फलश्रुतेश्च । या एवाहिताग्नेर्देवतास्ता एवौपासने, य एवाहिताग्नेर्धर्म(।)स्त एवौपासनिकस्य, य एवाहिताग्नेर्लोकः स एवौपासनिकस्येति शाठ्यायनिब्राह्मणम् ।

End:

पत्नीबहुत्वेऽपि यदि ज्येष्ठा होमकालेऽन्यत्र वसति वान्यदितरे (?) वा तिष्ठति किं न होतव्यं हुतमप्यहुत . . . यनिः । किं कनिष्ठायां नायं नियम इति जैमिनिः । सदा स्वामिनोऽसन्निधौ होतव्यमिति तैत्तिरिस्तैत्तिरिः ॥

Colophon :

इति शाठ्याय(नसूत्रं समाप्तम् ॥)

ज्येष्ठकृष्णचतुर्दश्यां शुक्लाब्दे बुधवासरे ।
लिखिता रामलिङ्गेन श्रुतिः शाठ्यायनी शुभा ॥

No. 1179. शाठ्यायनसूत्रम्.

ŚĀṬHYĀYANASŪTRAM.

Pages, 12. Lines, 22 on a page.

Begins on fol. 1*a* of the MS. described under No. 1063.

Copied in 1895 from the codex noticed under No. 1178.

Complete. Same as the last.

No. 1180. आपस्तम्बगृह्यसूत्रम्.

ĀPASTAMBAGṚHYASŪTRAM.

Pages, 19. Lines, 19 on a page.

Begins on fol. 51*a* of the MS. described under No. 199.

Complete.

The rites conducted with the domestic fire as dealt with by Āpastamba in the 27th Praśna of his Kalpasutra.

Beginning :

अथ कर्माण्याचाराद्यानि गृह्यन्ते । उदगयनपूर्वपक्षाहःपुण्याहेषु कार्याणि । यज्ञोपवीतिना । प्रदक्षिणम् । पुरस्तादुदग्वोपक्रमः । तथापवर्गः । अपरपक्षे पित्र्याणि । प्राचीनावीतिना । प्रसव्यम् । दक्षिणतोऽपवर्गः । निमित्तापेक्षाणि नैमित्तिकानि । अग्निमिद्ध्वा प्रागग्रैर्दर्भैरग्निं परिस्तृणाति ।

End :

परिषेचनान्तं कृत्वाभिमृतेभ्य उत्तरया दक्षिणतोऽश्मानं परिधिं दधाति दधाति ॥

No. 1181. आपस्तम्बगृह्यसूत्रम्.

ĀPASTAMBAGṚHYASŪTRAM.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 34. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

At the end an index of the beginnings of the 23 Khaṇḍas is given.

Same as the last.

No. 1182. आपस्तम्बगृह्यसूत्रम्.

ĀPASTAMBAGṚHYASŪTRAM.

Pages, 21. Lines, 6 on a page.

Begins on fol. 22*b* of the MS. described under No. 241.

Complete.

Same as the last.

No. 1183. आपस्तम्बगृह्यसूत्रम्.

ĀPASTAMBAGṚHYASŪTRAM.

Substance, palm-leaf. Size, 16 × 1 inches. Pages, 58. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Āpastambaśrāddhaprayōgaḥ 30*a*.

The work breaks off at the 9th Sūtra of the 23rd Khaṇḍa.

Same as the last.

No. 1184. आपस्तम्बगृह्यसूत्रम्.

ĀPASTAMBAGṚHYASŪTRAM.

Pages, 6. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 1058.

Contains Khaṇḍas 17 to 23.

No. 1185. आपस्तम्बगृह्यसूत्रम्.

ĀPASTAMBAGṚHYASŪTRAM.

Pages, 28. Lines, 7 on a page.

Begins on fol. 25*a* of the MS. described under No. 929.

Complete.

Same as the last.

No. 1186. आपस्तम्बगृह्यसूत्रभाष्यम्.

ĀPASTAMBAGṚHYASŪTRABHĀṢYAM.

Pages, 125. Lines, 17 on a page.

Begins on fol. 9*a* of the MS. described under No. 1063.

Complete.

Copied for the Library in 1895.

This is said to be the commentary on Āpastamba's Gṛhyasūtra by Kapardisvāmin.

Beginning :

अथ कर्माण्याचाराद्यानि गृह्यन्ते । अथशब्द आनन्तर्ये यज्ञं व्याख्यास्याम इति परिभाषाया एकविंशतिसंख्यास्थस्य यज्ञस्य व्याख्यां प्रतिज्ञाय श्रुतिलक्षणा हविर्यज्ञसंस्थास्सोमयज्ञसंस्थास्सविकृतयोर्व्य(व्या)ख्याताः । अथानन्तरमधिक्रियते(न्ते) कर्माणि । आचरणमाचारः शिष्टलक्षणः कर्मण्यविच्छेदेन प्रवर्तनं तस्मादाचरणात् । औपासनहोमादीनि पाकयज्ञशब्दवाच्यानि पात्राणि ग्रहणादीनि गृह्यन्ते ज्ञायन्ते यान्युत्सन्नपाठब्राह्मणेभ्यस्तानि व्याख्यास्याम इति वाक्यशेषः ।

End :

निशाया रात्रां मुहूर्तद्वयादूर्ध्वे

यत्रापां वहन्तीनां शब्दं [त]शृणुयात् तस्मिन् देशेऽग्न्युप[ा]समाधानादि अभिमृतेभ्यः आभिमुख्येन ये मृतास्तेभ्योऽभिमृतेभ्यः प(रि)धिमन्तर्द्धानं मृत्योर्दधाति । द्विरुक्तिर्मङ्गलार्था प्रश्नपरिसमाप्ता(प्त्यर्था) च ।

Colophon:

इत्यापस्तम्बगृह्यकपर्दिस्वामिभाष्ये अष्टमः पटलः ॥

No. 1187. आपस्तम्बगृह्यसूत्रभाष्यम्.

ĀPASTAMBAGṚHYASŪTRABHĀṢYAM.

Substance, palm-leaf. Size, 15 × 1⅝ inches. Pages, 82. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

The last leaf contains the following stanza:

सुबद्धं दुर्लभं भाष्यमिति तात्पर्यदर्शने ।
उक्तमुत्तर्कयन्भाष्यमुद्धृष्यन्देशिकोऽलिखत् ॥

Same as the last.

No. 1188. आपस्तम्बगृह्यसूत्रभाष्यम्—गृह्यतात्पर्यदर्शनम्.

ĀPASTAMBAGṚHYASŪTRABHĀṢYAM: GṚHYATĀTPARYADARŚANAM.

Substance, paper. Size, 13½ × 8⅜ inches. Pages, 265. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 105*a*. The other work herein is Gautamadharmasūtravyākhyā 1*a*.

This commentary is by Sudarśanācārya.

Beginning :

ॐशिवो नामरुपाभ्यां या देवी सर्वमङ्गला ।
तयोस्संस्मरणात्पुंसां सर्वतो जयमङ्गलम् ॥

यो वर्णैरिज्यते नित्यैः कर्मभिश्चोदितैर्निजैः ।
तेभ्योऽपवर्गदो यश्च तं नमाम्यद्वयं हरिम् ॥

आपस्तम्बमुनिं वन्दे मन्दधीहितकाम्यया ।
योऽनुष्ठेयपदार्थानां क्रमकल्पमकल्पयत् ॥

यत्कृतं वेदवद्भाष्यमाद्रियन्ते विपश्चितः ।
स कपर्दी चिरञ्जीयाद्वेदवेदार्थतत्त्ववित् ॥

सुदर्शनार्यः कुरुते गृह्यतात्पर्यदर्शनम् ।
केवलं वैदिकश्रद्धाप्रेरितो मन्दधीरपि ॥

अथ कर्माण्याचाराद्यानि गृह्यन्ते । अथशब्दा(ब्द) आनन्तर्यार्थः । तदर्थं पूर्ववृत्तमुच्यते । इह हि यज्ञा एकविंशतिभेदाः.

* * * *

एते च नित्याः नियतप्रदोषादिकालीनजीवननिमित्तका इत्यर्थः । कुतो नित्याः? जायमानो वै ब्राह्मणस्त्रिभिरृणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति । अत्र यज्ञेनेत्येकवचनं यज्ञं व्याख्यास्याम इतिवत् जात्यभिप्रायं मन्वानस्य भगवतो वसिष्ठस्य नैयमिकं ह्येतदृणसंस्तवमिति वचनेनैषामवश्यानुष्ठाना[म]प(व)गमात् ।

End :

दधाति दधाति(ती)ति द्विरुक्तिः प्रश्नपरिसमाप्तिसूचनार्था ॥

इत्थं सुदर्शनार्येण गृह्यतात्पर्यदर्शनम् ।
कृतं भाषा(ष्या)नुसारेण यथामति यथाश्रुति ।

अत्रानुक्तन्दुरुक्तं वा मम मान्द्याच्छ्रुतस्य वा ।
सन्मार्गप्रवणन्त्वेतत् क्षन्तुमर्हन्ति पण्डिताः ॥

इति सुदर्शनार्यकृते गृह्यतात्पर्यदर्शने अष्टमः पटलः ॥

Colophon:

सुदर्शनभाष्यं संपूर्णम् ॥

No. 1189. आपस्तम्बगृह्यसूत्रभाष्यम्—गृह्यतात्पर्यदर्शनम्.

ĀPASTAMBAGṚHYASŪTRABHĀṢYAM: GṚHYA-TĀTPARYADARŚANAM.

Substance, paper. Size, 12⅝ × 8¼ inches. Pages, 84. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, old.

Khaṇḍas 1 to 7, excepting 3 Sūtras at the end.

Same as the last.

The other work herein is Sandhyāvandanabhaṣyam 44*a*.

An extra passage is found in this codex between the initial stanzas and the beginning of the commentary. It is here extracted:

तत्रादौ तावद्गृह्यशब्दार्थो वृत्तिकारेण व्याख्यातः । गृहनिमित्तोऽग्निर्गृह्यः । तत्र बद्धानि कर्माण्यपि लक्षणया गृह्याणीत्युच्यन्ते । गृहशब्दो भार्यावचनः, येषान्तु दायविभागकाले अग्निरुत्पद्यते शालावचनः तेषां भार्यादिरग्निर्दायादिर्वा तस्मिन्नेवाग्नौ गृह्याणीति गोतमः । अथ कर्माण्याचाराद्यानि गृह्यन्ते ॥

No. 1190. आपस्तम्बगृह्यसूत्रभाष्यम्—गृह्यतात्पर्यदर्शनम्.

ĀPASTAMBAGṚHYASŪTRABHĀṢYAM: GṚHYA-TĀTPARYADARŚANAM.

Substance, palm-leaf. Size, 11⅞ × 1⅝ inches. Pages, 365. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same as the last.

No. **1191.** आपस्तम्बगृह्यसूत्रव्याख्यानम्—गृह्यतात्पर्यदर्शनम्.

ĀPASTAMBAGṚHYASŪTRAVYĀKHYĀNAM : GṚHYATĀTPARYADARŚANAM.

Pages, 144. Lines, 7 on a page.

Begins on fol. 134*a* of the MS. described under No. 245.

Breaks off in the 22nd Khaṇḍa.

No. **1192.** आपस्तम्बगृह्यसूत्रभाष्यम्—गृह्यतात्पर्यदर्शनम्.

ĀPASTAMBAGṚHYASŪTRABHĀṢYAM : GṚHYATĀTPARYADARŚANAM.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 230. Lines, 7 on a page. Character, Grantha. Condition, very much injured. Appearance, old.

Incomplete; much injured.

No. **1193.** आपस्तम्बगृह्यसूत्रभाष्यम्—गृह्यतात्पर्यदर्शनम्.

ĀPASTAMBAGṚHYASŪTRABHĀṢYAM : GṚHYATĀTPARYADARŚANAM.

Substance, palm-leaf. Size, 14¼ × 1½ inches. Pages, 12. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 46*a*. The other works herein are: Tarkasaṅgrahaparibhāṣā fol. 1*a*. Tarkasaṅgrahavākyārthanirukti fol. 15*a*, Tarkasaṅgraha fol. 38*a*.

The commentary breaks off at the 12th Sūtra of Khaṇḍa 1.

No. **1194.** आपस्तम्बगृह्यसूत्रभाष्यम्—गृह्यतात्पर्यदर्शनम्.

ĀPASTAMBAGṚHYASŪTRABHĀṢYAM : GṚHYATĀTPARYADARŚANAM.

Substance, palm-leaf. Size, 16¼ × 1¾ inches. Pages, 126. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the commentary of Sudarśanācārya on the first 18 Khaṇḍas, and breaks off at the 11th Sūtra of the 19th Khaṇḍa.

No. 1195. आपस्तम्बगृह्यसूत्रकारिका.

ĀPASTAMBAGṚHYASŪTRAKĀRIKĀ.

Pages, 40. Lines, 8 on a page.

Begins on fol. 22*a* of the MS. described under No. 1074.

Complete.

For remarks and extracts see pages 11 and 166 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS. for the year 1893–94, No. 2, Madras.

No. 1196. आपस्तम्बगृह्यप्रयोगदीपिका.

ĀPASTAMBAGṚHYAPRAYŌGADĪPIKĀ.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 100. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

The work begins on fol. 31*b*. The other works herein are : Āpastambagṛhyaprayōgadīpikā fol. 1*a*, Saṅkīrṇasaṅgrahaḥ fol. 17*a*.

The work beginning on fol. 1*a* is much injured, extends over 32 pages, and contains 10 Khaṇḍas.

Complete.

This is a commentary on Āpastambagṛhyasūtra, with special reference to ritualistic procedure (Prayōga).

Beginning :

अथ कर्माण्याचाराद्यानि गृह्यन्ते । अथ प्रत्यक्षश्रुतिविहितयज्ञसामान्यदर्शपूर्णमासादिकर्मव्याख्यानात्पूर्ववृत्तादनन्तरम् आचारात् स्वानुमेयश्रुत्यवगम्यगार्ह्यकर्मप्रवर्तनरूपात् यानि पाकयज्ञशब्दवाच्यौपासनहोमा-

दीनि तेष्वधिकरिष्यमाणदेहसंस्कारार्थपाणिग्रहणादीनि च कर्माणि गृह्यन्ते कर्तव्यत्वेन ज्ञायन्ते तानि व्याख्यायन्त इति शेषः। तानि कथं कर्तव्यानी-त्याकाङ्क्षायामाह उदगयनेत्यादि।

End:

परिधिं मृत्योरन्तर्द्धानभूतमश्मानं दक्षिणतः दक्षिणस्यान्दिशि परि-धिवचनात् प्राच्यां विनेति केचित्। दधाति निदधाति दधाति दधातीति पुनरुक्तिः प्रश्नसमाप्तिं सूचयति ॥

Colophon:

इति गृह्यप्रयोगदीपिकायां त्रयोविंशः खण्डः ॥

अत्रानुक्तं दुरुक्तं वा मतिमान्द्याच्छ्रुतस्य च।

सन्मार्गप्रवणानां नः क्षन्तुमर्हन्ति पण्डिताः ॥

No. 1197. आपस्तम्बगृह्यप्रयोगदीपिका.

ÁPASTAMBAGṚHYAPRAYŌGADĪPIKĀ.

Substance, paper. Size, 8¼ × 6⅜ inches. Pages, 207. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, new. Copied in 1895.

Begins on fol. 44*a*.

The other works herein are: Bhāradvajasūtram 1*a*. Āśauca-saṅgrahatrim̐śacchlōkīvyākhyā 13*a*, Aghasaṅgrahaḥ 33*a*, Bōdhāya-nōktadēvapūjāvidhānam 148*a*. Yajurvēdabrāhmaṇam 163*a*, Nāga-pratiṣṭhā 171*a*, Navagrahayajñaḥ 179*a*. Kṛkalāsaśāntiḥ 182*b*, Sarpaśāntiḥ 184*b*. Puruṣasūktahōmaḥ 191*a*. Jaḍōpanayanam 197*a*, Vṛṣōtsarjanam 198*a*, Mārkaṇḍēyapūjā 200*a*, Ulūkaśāntiḥ 202*b*, Ṣaṣṭipūrtiśāntiḥ 204*a*, Brahmacāriṇārāyaṇabaliḥ 206*a*, Aśanihata-prāyaścitta 207*b*, Mēghamālāmañjari 212*a*, Rasarañjanam 231*a*, Śilpaśāstram 251*a*, Vētāḷapañcavim̐śatikathā 277*a*.

Complete. Same as the last.

No. 1198. गृह्यरत्नम्.

GRHYARATNAM.

Substance, paper. Size, 13 × 8¼ inches. Pages, 69. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains 21 Khaṇḍas; complete. The work is by Vaidikasārvabhauma. It treats of the subjects dealt with by Āpastamba in his Gṛhya-sūtras, and gives explanations.

Begins on fol. 23*a*. The other works herein are: Āpastambapitṛmēdhapraśnabhāṣyam 1*a*, Smṛticūḍāmaṇisaṅgrahaḥ 59*a*.

Beginning:

अथ निषेकादीन् संस्कारान् व्याख्यास्यामो गर्भाधानं पुंसुवनं सीमन्तोन्नयनं जातकर्म नामकरणमन्नप्राशनं चूडाकर्मोपनयनं चत्वारि वेदव्रतानीत्येते नियता ब्राह्मास्संस्काराः । पाकयज्ञादयो दैवाः । ते पुनरुभये ब्राह्महेतवः ।

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया मतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥ इति मनूक्तेः ॥

End:

मन्त्रपूतं स्थितं कायान्नोद्धरेदुपवीतकम् ।
सकृदुद्धरणाद्विप्रः प्रायश्चि(त्ती)यते द्विजः ॥

क्रोधान्मोहाद्बलाद्वापि ब्रह्मसूत्रं छिनत्ति यः ।
नद्यां स्नात्वाथ गायत्रीं जपेदष्टसहस्रकम् ॥

संस्कारैस्संस्कृतः पूर्वैरुत्तरैरपि संस्कृतः ।
नित्यमिष्टगुणैर्युक्तैर्ब्रह्मभूयाय कल्पते ॥

इत्येकविंशः खण्डः ॥

गृह्यान्तरोक्तार्थविशेषमापस्तम्बाश्रयं वैदिकसार्वभौमः ।
प्राह स्मृतीर्वीक्ष्य हि गृह्यरत्नं विवेकदं तत्कलयन्तु सन्तः ॥

Colophon:

गृह्यरत्नं समाप्तम् ॥

No. 1199. गृह्यरत्नम्.

GRHYARATNAM.

Substance, palm-leaf. Size, 11¼ × 1¼ inches. Pages, 64. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Imperfect. Leaves 25 to 32, 35 to 39, and 41 to 45 are lost.

Same as the last.

Before the beginning, an additional stanza is found herein :

श्रीनिगमशिखरगुरुवरचरणसरसिजस्रवन्मधुरसास्वादैः ।
अत्यन्ततुन्दिलो मे भूयान्मानसमधुव्रतश्चपलोऽयम् ॥

No. 1200. गौतमधर्मसूत्रम्.

GĀUTAMADHARMASŪTRAM.

Substance, paper. Size, 11⅞ × 9⅞ inches. Pages, 31. Lines, 21 on a page. Character, Dēvanāgari. Condition, injured. Appearance, old.

Contains the 29 Adhāyayas of the Dharmaşūtra of Gautama.

This work, containing the social and religious laws of Brahmanism, is intended for the guidance of the followers of the Drāhyāyaṇasūtra.

Beginning:

वेदो धर्ममूलं, तद्विदां च स्मृतिशीले दृष्टो धर्मव्यतिक्रमः, साहसं च महतां न तु दृष्टार्थे अवरदौर्बल्यात्, तुल्यबलविरोधे विकल्पः, उपनयनं ब्राह्मणस्याष्टमे पञ्चमे वा काम्य(र्ये)म् । गर्भादिस्संख्या वर्षाणां, तत् द्वितीयं जन्म, तद्यस्मात् स आचार्यो वेदानुवचनाच्च.

End:

श्रोत्रियो वेदवित् शिष्टो विप्रतिपत्तौ यदोहयत्तोऽयमप्रभवो भूतानां हिंसानुग्रहयोगेषु धर्मिणां विशेषेण स्वर्गं लोकं धर्मविदाप्नोति ज्ञानाभिनिवेशाभ्यामिति धर्मो धर्मो धर्मः ॥

तृतीयोऽध्यायः ॥

Colophon:

इति गौतमधर्मस्समाप्तः ॥

No. 1201. गौतमधर्मसूत्रम्.

GAUTAMADHARMASŪTRAM.

Substance, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 47. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Same as the last.

No. 1202. गौतमधर्मसूत्रम्.

GAUTAMADHARMASŪTRAM.

Substance, palm-leaf. Size, 17⅝ × 1⅜ inches. Pages, 31. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Aśvattha-vivāha and Upanayana 17*a*.

Complete. Same as the last.

No. 1203. गौतमधर्मसूत्रम्.

GAUTAMADHARMASŪTRAM.

Substance, palm-leaf. Size, 16⅛ × 1⅛ inches. Pages, 35. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 20*b*. The other works herein are: Auśanasa-smṛtiḥ 1*a*, Viṣṇu-smṛtiḥ 38*a*, Yama-smṛtiḥ 40*b*, Vyāsa-smṛtiḥ 41*b*, Hārīta-smṛtiḥ 47*b*, Ātrēya-smṛtiḥ 53*a*.

Complete.

Same as the last.

No. 1204. गौतमधर्मसूत्रम्.

GAUTAMADHARMASŪTRAM.

Substance, paper. Size, 9 × 7 inches. Pages, 37. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Smṛtisārasaṅgrahaḥ 20*a*.

Complete. Same as the last.

No. 1205. गौतमधर्मसूत्रव्याख्या—मिताक्षरा.

GAUTAMADHARMASŪTRAVYĀKHYĀ : MITĀKṢARĀ.

Pages, 204. Lines, 20 on a page.

Begins on fol. 1*a*. of the MS. described under No. 1188.

Contains the commentary of Haradatta on Gautama's Dharma-sūtra.

Beginning:

नमो रुद्राय यद्धर्मशास्त्रं गौतमनिर्मितम् ।
क्रियते हरदत्तेन तस्य वृत्तिर्मिताक्षरा ॥

वेदो धर्ममूलं कर्मजन्याभ्युदयनिश्रेयसहेतुरपूर्वाख्यात्मगुणो धर्मः तस्य मूलं प्रमाणं वेदः मन्त्रब्राह्मणात्मकः जातावेकवचनम्.

End:

धर्मवित् सम्यक् ज्ञानतात्पर्यतदनुष्ठानाभ्यां विशेषेण धर्मानुष्ठातृभ्योऽप्याधिक्येन स्वर्गं लोकमाप्नोति । धर्मो धर्मः आदित आरभ्यैवमन्तो धर्मः । द्विरुक्तिरध्यायसमाप्तौ ॥

Colophon:

इति श्रीगौतमीयधर्मशास्त्रव्याख्यायां श्रीहरदत्तकृतमिताक्षरायामेकोनत्रिंशोऽध्यायः ॥

गौतमसूत्रव्याख्या समाप्ता ॥

No. 1206. गौतमधर्मसूत्रभाष्यम्.

GAUTAMADHARMASŪTRABHĀṢYAM.

Substance, paper. Size, 7¼ × 6½ inches. Pages, 22. Lines, 13 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the commentary of Maskarin (an ascetic) on Adhyāyas 6 and 7, and breaks off in the 8th Adhyaya.

Beginning:

इदानीमतिथिपूज(ा)[ना]प्रसङ्गेनान्येषामप्यन्यपूजाप्रकरणमाह—

पादोपसङ्ग्रहणं समवायेऽन्वहम् ।

पादयोरुपश्लेषणमुपसर्गद्वयविधानात् स्मृत्यन्तरोपदिष्टेन विधिना कर्तव्यम् । यथाह मनुः—व्यत्यस्तपाणिना कार्यमुपसङ्ग्रहणमित्यादि । समवाये सङ्गमे अन्वहं प्रतिदिनं कर्तव्यमिति शेषः ।

* * * *

इति गौतमभाष्ये मस्करीये षष्ठोऽध्यायः ॥

इति . . . . सप्तमोऽध्यायः . . . ॥

End:

इदानीं कियता पुनः श्रुतेन बहुश्रुतो भवतीत्यत आह—सं एष बहुश्रुतो भवतीति ॥

No. 1207. बोधायनपरिभाषा.

BŌDHĀYANAPARIBHĀṢĀ.

Pages, 14. Lines, 37 on a page.

Copied in 1898.

Begins on fol. 28*a* of the MS. described under No. 1174.

Incomplete. Breaks off in the 15th Khaṇḍa.

Beginning:

अथ वै भवन्ति जायमानो वै ब्राह्मणास्त्रिभि: ऋणवा जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्य: प्रजया पितृभ्य इति । ब्रह्मचर्यं व्याख्यास्याम: । आसमावर्तनादेवैतत् भवन्ति(ति) नाचीर्णव्रतो ब्रह्मचारी भवतीति तदेतदाश्रमं व्याख्यातम् । अत ऊर्ध्वं ब्रह्मचर्यं येनानृणो भवति स्वदारा इत्येकं मन्त्रवत् प्रयोग इत्येकमृतावित्यपरमथाधिब्रह्मचर्यम्.

End:

भूरायुर्मे धारयत प्राणं मे धारयत प्रजां मे धारयत पशून् मे धारयत मा म आयु: प्रजा: पशव: परासिच्ये न मा म आयु: प्राण: प्रजा: पशव: परासि[न]च्येरन्नित्यथ यदि कन्योपसाद्यमानापोह्यमानावापतेत्तामुत्थाय ॥

No. 1208. बोधायनधर्मसूत्रम्.

BŌDHĀYANADHARMASŪTRAM.

Pages, 92. Lines, 18 on a page.

Begins on fol. 55*a* of the MS. described under No. 242.

Contains 1 to 4 Praśnas.

This gives the religious and social laws of Brahmanism as taught by Bōdhāyana.

Beginning;

आपस्तम्बमुनिं वन्दे सर्वज्ञानप्रदायकम् ।
बोधायनं मुनिश्रेष्ठं स्मृतृ(स्मर्तृ)णामपि दैवतम् ॥

उपदिष्टो धर्मः प्रतिवेदं तस्यानुव्याख्यास्यामः ।

स्मार्तो द्वितीयस्तृतीयश्शिष्टागमः शिष्टा विगतमत्सराः निरहङ्काराः कुम्भीधान्या अलोलुपा दम्भकपटलोभमोहक्रोधविवर्जिताः ।

धर्मेणाधिगतो येषां वेदस्सपरिबृंहणः ।
शिष्टास्तदनुमानज्ञाः श्रुतिप्रत्यक्षहेतवः ॥ इति ॥

तदभावे दशावरा परिषत् अथाप्युदाहरन्ति—
चातुर्वेद्यवि (पि त्रै) कल्पी चाङ्गविद्धर्मपाठकः ।
आश्रमस्थाश्च ये विप्राः परिषदेषा दशावरा ॥

पञ्च वा स्युस्त्रयो वा स्युरेको वा स्यादनिन्दितः ।
प्रतिवक्ता तु धर्मस्य नेतरे तु सहस्रशः ॥

* * * *

निवृत्तः पापकर्मभ्यः प्रवृत्तः पुण्यकर्मसु ।
यो विप्रस्तस्य सिध्यन्ति विना यन्त्रैरपि क्रिया(ः) ॥

ब्राह्मणा (ऋ)जवस्तस्माद्यद्यदिच्छन्ति चेतसा ।
तत्तदासाधयन्त्याशु संशुद्धा ऋजुकर्मभिः ॥

एवमेतानि यन्त्राणि तावत्कार्याणि धीमता ।
यावत्कालेन वोपैति विग्रहं शुद्धिमात्मनः ॥

एभिर्यन्त्रैर्विशुद्धात्मा त्रिरात्रोपोषितस्तथा ।
तदारभेत येनर्द्धिं कर्मणां प्राप्तुमिच्छति ॥

End:

दशवारं तथा होमं सर्पिषा सवनत्रयम् ।
पूर्वा सेवा भवेदेषां मन्त्राणां कर्मसाधने ॥
मन्त्राणां कर्मसाधन इति ॥

Colophon:

इति श्रीबोधायनीये धर्मशास्त्रे चतुर्थः प्रश्नस्समाप्तः ॥
अयं प्रश्नश्चतुश्चत्वारिंशदुत्तरशतश्लोकः ॥
स्मार्ते तच्छेषोपारितना इमे धर्मप्रश्नाः चत्वारः ॥

No. 1209. बोधायनधर्मप्रश्नः.

BŌDHĀYAṆADHARMAPRAŚNAḤ.

Substance, paper. Size, 12 × $9\frac{1}{2}$ inches. Pages, 88. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in 4 Praśnas.

This work is the same as that described under No. 1208. But the first stanza is wanting herein.

End:

यान्ससायानिष्टमन्त्रान् चादशाहनिता
दशावरन्तथा होमं सर्पिषा सवनत्रयम् ॥
पूर्वसाधन इति ॥
इति चतुर्थप्रश्नस्समाप्तः ॥ सा रुद्राः ॥
अथातस्संप्रवक्ष्यामि प्रायश्चित्तम् ॥

Colophon:

बोधायनधर्मशास्त्रं समाप्तम् ॥

No. 1210. बोधायनधर्मप्रश्नः.

BŌDHĀYAṆADHARMAPRAŚNAḤ.

Substance, palm-leaf. Size, 12 × $1\frac{1}{8}$ inches. Pages, 152. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Almost complete. Same as the last.

No. 1211. बोधायनधर्मव्याख्या.

BŌDHĀYANADHARMAVYĀKHYĀ.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 44. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 35*a*. The other works herein are **Purāṇa-ślōkaḥ**—117 stanzas 1*a*, Prayōgacandrikā 6*a*.

Contains the commentary on 4 Adhyāyas of Bōdhāyana's **Dharmasūtra** by Govindasvāmin. The commentary seems to break off in the course of the 5th Adhyāya. The end of the 4th **Adhyāya** agrees with that of the 7th Khaṇḍa of the I Praśna of the text.

Beginning:

. . । रणं भक्तिमतां मनोरथान्
अकारणेनैव सुतत्त्वबोधकम् ।
निवारणं सर्वदिगन्तराद्भयं
सुवारणास्यं सुमुखं भजामहे ॥
शुक्लाम्बरधरं विष्णुं शशिवर्णञ्चतुर्भुजम् ।
प्रसन्नवदनन्ध्यायेत्सर्वविघ्नोपशान्तये ॥

इति प्रतिष्टो(ष्ठो) धर्मः प्रतिवेदं प्रतिशाखमतीन्द्रियार्थप्रतिपादकामानुषो ग्रन्थराशिर्वेदः तत्प्रतिपाद्यो धर्मः । यद्यप्येकैकस्यां शाखायां परिपूर्णान्यङ्गानि तथापि कल्पसूत्रान्तरैः शाखान्तरे(रो)पेताङ्गोपसङ्ग्रहः क्रियत एव ।

* * * *

इति बोधायनीये धर्मविचारणे गोविन्दस्वामिनि प्रथमोऽध्यायः ॥

* * * *

इति बोधायनीये धर्मव्याख्याने गोविन्दस्वामिनि द्वितीयोऽध्यायः ॥

* * * *

इति बोधायनीये गोविन्दधर्मिणि तृतीयोऽध्यायः ॥

* * * *

इति . . . . . . चतुर्थोऽध्यायः ॥

End:

सपिण्डे सप्तमासाद्दन्ताद्वोदकोपस्पर्शनम् । सप्तमासादर्वाग्दन्तजननाद्वा तेषु मृतेषूदकोपस्पर्शनं स्नानमात्रमेव सपिण्डानां यत्तु तस्मिन्नवधावेकाहाशौचन्तेन ॥

No. 1212. गौतमधर्मसूत्रम्.

GAUTAMADHARMASŪTRAM.

Pages, 33. Lines, 23 on a page.

Begins on fol. 1*b* of the MS. described under No. 199.

Complete.

Contains two Praśnas (each of 20 Khaṇḍas) of Gautamasūtra.

Beginning:

अथाचारान् प्रवक्ष्याम्याचाराल्लभते धर्ममाचारादेव धनमाचारादेव सुखमाचारादेव मोक्षं प्राप्नुयादुद्धा(त्था)य पश्चिमे यामे शान्तमानसो विनिद्रस्सति विरोधे तं त्यक्त्वा नो मोचयेत्तत्र संस्थितस्समौ प्राणापानौ धृत्वा दिवाकरं संस्थाप्य दिवाकरेण प्रोत्फुल्लिते पद्मे मानसं हंसं समाश्रयेदङ्गुष्ठमात्रं पुरुषं परापरं ज्योतीरूपं समालोक्य दिव्यं दिव्येन चक्षुषा यथालाभमुषःकाले स्थित्वा स्तोत्रैरनेकधा स्तुत्वा सोपानस्को(त्को) बहिर्यायात्स जलाशयं विरलमस्ति.

End:

पाकयज्ञा विविधा यज्ञाः, अनृतं मद्यगन्धं, भुञ्जानस्य मस्तके, अङ्गवङ्गकलिङ्गदेशानि, अस्नात्वा भोजने, धान्ये गृहस्थिते, आव्रतस्यान्नमपुत्रस्स्यात्, निगलेन बद्धस्य, म्लेच्छादीनां पुष्करिण्याम्, अनिर्दशाहगोमहिषी श्वजम्बूकरासभैः, कामतः स्वैरी शूद्रागमने, कामतो गुरुतल्पगामी, सुरापस्सुराम्बु, घृतगोमूत्रं, मातृगमनदुहितृगमन, अथ ब्रह्महत्यासमपातकं,

ब्रह्महा कुष्ठी स्यात् तैजसापहारी, ब्रह्महा क्षयरोगी स्यात्, अथ वेद[ना]भ-नभ्य[ा]सन्, अथातो धर्मशेषान् व्याख्यास्यामः ॥

No. 1213. गौतमधर्मसूत्रम्.

GAUTAMADHARMASŪTRAM.

Pages, 17. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 486.

Contains only the second Praśna of the work described under the last number.

Beginning :

अथातो धर्मशेषान् व्याख्यास्यामोऽन्त्यपक्षे स्थावरान्तां दोषैर्मनोवाक्कायकर्मजैर्जीवोऽयं भवयोनिशतेषु प्रयाति । परद्रव्याणि मनसा ध्याय-न्तथान्यानि पापानि चिन्तयन्वितताभिर्निवेशी जायतेऽन्त्यासु योनिषु पिशुनोऽनृतवादी परुषोऽबद्धप्रल(ा)पी मृगपक्षियोनिषु जायते । दत्तादाननिरत-परदारगो हिंसकश्चा(श्मा)दिर्विविधानेन(क)स्थावरेष्वभिजायते ।

End :

कामतस्स्वैरी शूद्यागमने, कामतो गुरुतल्पगामी, सुरापस्सुराम्बु, मातृ-गमनदुहितृगमन. अथ ब्रह्महत्यासमपातकं, ब्रह्महा कुष्ठी स्यात्, ब्रह्महा क्षयरोगी स्यात्, अथ वा वेदम(न)भ्यसन्, अथातो धर्मशेषान् व्याख्यास्यामः ॥

No. 1214. गौतमधर्मसूत्रम्.

GAUTAMADHARMASŪTRAM.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 28. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Contains the 20 Khaṇḍas of the 2nd Praśna of the Sūtras of Gautama described under the last number.

Begins on fol. 64*a*. The other works herein are: Viṣṇusahasranāmabhāṣya 1*a*, Nārāyaṇāṣṭōttaraśatanamastōtra 78*a*. Nārāyaṇavarman 79*b*.

No. 1215. आपस्तम्बधर्मप्रश्नः.

ĀPASTAMBADHARMAPRAŚNAḤ.

Pages, 54. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 22*b* of the MS. described under No. 199.

Contains the two Praśnas (of 32 & 29 Khaṇḍas respectively) of the **Dharmasūtra** of Āpastamba.

The code of religious and social laws according to Āpastamba.

Beginning :

अथातस्सामयाचारिकान् धर्मान् व्याख्यस्यामः । धर्मज्ञसमयः प्रमाणम् । वेदाश्च । चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः । तेषां पूर्वः पूर्वो जन्मतश्श्रेयान् । अशूद्राणामदुष्टकर्मणामुपायनं वेदाध्ययनमग्न्याधेयं फलवन्ति च कर्माणि । शुश्रूषा शूद्रस्येतरेषां वर्णानाम्। पूर्वस्मिन् पूर्वस्मिन् वर्णे निश्रेयसं भूयः। उपनयनं विद्यार्थस्य श्रुतितः सँस्कारः । सर्वेभ्यो वै देवे(वेदे)भ्य(स्)सावित्र्यनूच्यत इति हि ब्राह्मणम ।

End :

सर्वविद्यानामप्युपनिषदामुपाकृत्य । शय्यादेशे कामलिङ्गेन। आर्याः प्रयता वैश्वदेवे । अपि वा लेपान् प्रक्षाल्य । पाणिग्रहणादधिगृहमेधिनोर्व्रतम् । पाणिग्रहणादार्या जात्या येन कृताभिक्षणेन वर्णा सह देवमनुष्या विलयनं चत्वो(त्वारो) व्याख्याताः क्षेत्रमेकादश ॥

Colophon :

धर्मप्रश्नस्समाप्तः ॥

No. 1216. आपस्तम्बधर्मप्रश्नः.

ĀPASTAMBADHARMAPRAŚNAḤ.

Pages, 26. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 245.

Complete.

Same as the last.

No. 1217. आपस्तम्बधर्मसूत्रम्.

ĀPASTAMBADHARMASŪTRAM.

Substance, palm-leaf. Size, 17⅛ × 1⅜ inches. Pages, 61. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 157*a*. The other works herein are: Āhnikam 1*a*, Āśaucaṣaḍaśītiḥ 49*a*, Prayōgapaddhatiḥ 70*a*. Leaves from 53 to 63 are lost. A leaf without number is added between the 47th and the 48th leaves.

Complete.

No. 1218. आपस्तम्बधर्मसूत्रम्.

ĀPASTAMBADHARMASŪTRAM.

Substance, palm-leaf. Size, 11¾ × 1¼ inches. Pages, 61. Lines, 6 on a page. Character, Nandināgari. Condition, slightly injured. Appearance, old.

Complete.

The 13th leaf also is marked with 12, and the number 18 is omitted in the marking of the leaves.

No. 1219. आपस्तम्बधर्मसूत्रम्.

ĀPASTAMBADHARMASŪTRAM.

Substance, palm-leaf. Size, 11¼ × 1 inches. Pages, 156. Lines, 5 on a page. Condition, much injured. Appearance, old.

Commences with the 2nd Khaṇḍa of the 1st Praśna, and breaks off in the 29th Khaṇḍa of the 2nd Praśna.

Same as the last.

No. 1220. आपस्तम्बधर्मसूत्रव्याख्या—उज्ज्वला.

ĀPASTAMBADHARMASŪTRAVYĀKHYĀ : UJJVALĀ.

Substance, paper. Size, $13\frac{1}{8} \times 8\frac{1}{8}$ inches. Pages, 171 Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, new.

Bgins on fol. 49*a*. The other work herein is Āpastambapitṛmēdhapraśnavyākhya 1*a*.

Complete.

The commentary of Haradattācārya on the Dharmasūtra of Āpastamba.

Beginning :

प्रणिपत्य महद्ब्रह्म हरदत्तेन धीमता ।
धर्मार्थप्रश्नयोरेषा क्रियते वृत्तिरुज्वला ॥

अथातस्सामयाचारिकान् धर्मान् व्याख्यास्यामः——अथ शब्द आनन्तर्ये अतश्शब्दो हेता(तौ) उक्तानि श्रौतानि गार्ह्याणि च कर्माणि वक्ष्यमाणान् धर्मानपेक्षन्ते. कथम् आचान्तेन कर्तव्यमिति वचनादाचमनमपेक्षन्ते, सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु इति वचनात्सन्ध्यावन्दनम् (मपि) । एवमशुचिकरनिर्वेषात्(षः,) द्विजातिकर्मभ्यो हानिः पतनमिति वचनात् ब्रह्महत्यादिप्रायश्चित्तानि च । एवमन्येष्वपि यथासम्भवमपेक्षा द्रष्टव्याः.

End :

सर्वजनपदेष्वेकान्तसमाहितमार्याणां वृत्तं सम्यग्विनीतानामात्मवतामलोलुपानामदाम्भिकानां वृत्तिसादृश्यं भजेत । एवमुभौ लोकावभिजयति । स्त्रीभ्यस्सर्ववर्णेभ्यश्च धर्मशेषान् प्रतीयात् इत्येके इत्येके । उक्तव्यतिरिक्ता

धर्माधर्मशेषाः तान् स्त्र्यादेरपि सकाशात् प्रतीयात् इत्येके मन्यन्ते । ते च प्रतिजनपदं प्रतिका(कु)लं च भिन्नाः तथैव प्रत्येतव्याः । तत्र चार्या मेषस्थे सवितर्यादित्यपूजामाचरन्ति भूमौ मण्डलं विलिख्येता[दी]न्युदाहरणानि ।

Colophon :

इति हरदत्तमिश्रविरचितायां धर्मव्याख्यायां द्वितीयः प्रश्नस्समाप्तः ॥

No. 1221. आपस्तम्बधर्मप्रश्नव्याख्या—उज्वला.

APASTAMBADHARMAPRAŚNAVYĀKHYA: UJJVALĀ.

Pages, 166. Lines, 8 on a page.

Begins on fol. 14*a* of the MS. described under No. 245.

Complete. Same as the last.

Colophon :

इति श्रीहरदत्तमिश्रविरचितायां धर्मप्रवृत्तावुज्वलायां द्वितीयप्रश्न एकादशः पटलः ॥ समाप्तेयमुज्वला ॥

No. 1222. आपस्तम्बधर्मसूत्रव्याख्या—उज्ज्वला.

APASTAMBADHARMASŪTRAVYĀKHYĀ : UJJVALĀ.

Substance, palm-leaf. Size, 12 × 1⅛ inches. Pages, 30. Lines, 6 on a page. Character, Grantha. Condition, injured. The ends of leaves are torn. Appearance, old.

Contains the commentary of Haradatta on 3 Khaṇḍas, and breaks off in the course of the 4th Khaṇḍa.

No. 1223. आपस्तम्बधर्मसूत्रव्याख्या—उज्ज्वला.

ĀPASTAMBADHARMASŪTRAVYĀKHYĀ: UJJVALĀ.

Substance, palm-leaf. Size, 19⅜ × 1½ inches. Pages, 74. Lines, 10 on a page. Character, Telugu. Condition, slightly injured. Appearance , old.

Begins on fol. 1*a*. The other work herein is Svapnadhyāya 39*a*.

Contains the commentary on the first Praśna.

No 1224. आपस्तम्बधर्मसूत्रव्याख्या—उज्वला.

ĀPASTAMBADHARMASŪTRAVYĀKHYĀ : UJJVALĀ.

Substance, palm leaf. Size, 16⅜ × 1⅜ inches. Pages, 143. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

The first leaf is lost.

Contains the commentary of Haradatta on 31 Khaṇḍas of the I Praśna of the Sūtra, and breaks off in the 32nd Khaṇḍa.

No. 1225. आपस्तम्बधर्मसूत्रव्याख्या—उज्वला.

ĀPASTAMBADHARMASUTRAVYĀKHYĀ : UJJVALĀ.

Substance, palm-leaf. Size, 18⅞ × 1⅜ inches. Pages, 300. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Three leaves in the beginning and in the end are much injured.

Complete. Same as the last.

No. 1226. आपस्तम्बधर्मव्याख्या—उज्वला.

ĀPASTAMBADHARMAVYAKHYĀ : UJJVALĀ.

Substance, paper. Size, 12⅝ × 1 inches. Pages, 18. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, new. Presented to the Library in 1893.

Begins on fol. 136*a*. The other works herein are : Caturdaśalakṣaṇī 1*a*, Smṛticandrikā 31*a*, Vyadhikaraṇadharmāvacchinnābhāvavivṛti 146*a*, Nyāyagrantha 194*a*.

Contains the commentary of Haradatta up to the 35th Sūtra of the 3rd Khaṇḍa of the I Praśna.

No. 1227. आपस्तम्बधर्मसूत्रव्याख्या—उज्ज्वला.

ĀPASTAMBADHARMASŪTRAVYĀKHYĀ : UJJVALĀ.

Substance, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 404. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

No. 1228. आपस्तम्बधर्मव्याख्या—उज्ज्वला.

ĀPASTAMBADHARMAVYĀKHYĀ: UJJVALĀ.

Substance, palm-leaf. Size, $18 \times 1\frac{1}{2}$ inches. Pages, 240. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Contains the commentary of Haradatta from the 5th Khaṇḍa of the first Praśna to the end of the 12th Khaṇḍa of the second Praśna.

No. 1229. वैखानसधर्मसूत्रम्.

VAIKHĀNASADHARMASŪTRAM.

Pages, 65. Lines, 12 on a page. Transcribed for the Library in 1894.

Begins on fol. 103*a* of the MS. described under No. 1176.

Refer to pages 6 and 155 of M. Seshagiri Sastri's "Report on a Search for Sanskrit and Tamil MSS." for the year 1893–94, No. 2, Madras.

No. 1230. वैखानसधर्मसूत्रम्.

VAIKHĀNASADHARAMASŪTRAM.

Substance, paper. Size, $8\frac{1}{4} \times 5\frac{1}{4}$ inches. Pages, 17. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new. Purchased for the Library in 1893.

Contains the first Praśna of the Dharmasūtra.

No. 1331. कात्यायनापितृमेधसूत्रम्.

KĀTYĀYANAPITṚMĒDHASŪTRAM.

Pages, 88. Lines, 20 on a page,

Begins on fol. 104*a* of the MS. described under No. 199.

Contains 23 Khaṇḍas.

Treats of the funeral rites according to Kātyāyana.

Beginning:

अथातः पैतृमेधिकदहनम्—अनाहिताग्नेः मरणसंशये प्राप्ते अद्भिस्स्नात्वा यथोक्तप्रायश्चित्तं, कृत्वा गोदानादिदशदानानि कृत्वा गोमयेनोपलिप्तदेशे कुशास्तृतभूमौ दक्षिणशिरसं निधाय, ब्रह्मविदाप्नोति परम् । भृगुर्वै वारुणिरित्येतावनुवाकौ दक्षिणे कर्णे जपश्च कृत्वा प्राचीनावा(वी)ती प्राणानायम्य सुखेन प्राणोत्क्रमणासिद्ध्यर्थमुत्क्रान्तिसंज्ञकधेनुदानं कारिष्ये.

End:

कुर्यादहरहश्श्राद्धममावास्यां विना सदा ।
नित्योदकलशं श्राद्धं न कुर्याद(दा)नुमासिके ॥
यतीनां मरणे प्राप्ते दशाहाभ्यन्तरो यदि ।
ज्ञातीनाञ्च सपिण्डानां प्रत्यब्दं नैव कारयेत् ॥
वपनं दहनात्पूर्वं कुर्याच्चेत्पितृघातकः ।
तस्मात्सर्वप्रयत्नेन वपनन्दहनात्परम् ॥

Colophon:

इति कात्यायनसूत्रं समाप्तम् ॥

No. 1232. बोधायनपितृमेधप्रश्नः

BŌDHĀYANAPITṚMĒDHAPRAŚNAḤ.

Pages, 18. Lines, 40 on a page.

Purchased for the Library in 1894.

Begins on fol. 17*b* of the MS. described under No. 1174.

Contains 3 Praśnas.

The first Praśna contains 15, the second 11, and the third 12 Khaṇḍas.

Ritualistic procedure relating to funeral rites according to Bōdhāyana.

Beginning:

अथ यद्याहिताग्निर्निर्ममारं गच्छत्युसपता वा जरया वाग्निष्ठ एवास्य यजमानायतने शयनं कल्पयेयुर्जघनेन गार्हपत्यं तदस्मै भक्षानाहरन्ति, यावदलं भक्षाय मन्यते, स यद्यु हागतो भवति । पुनरेति यद्यु वै प्रैति न पयस्समासिञ्चत्यथैतदग्निहोत्रं सायमुपक्रमम् ।

End:

अथैषा पत्नी । अथातः परिव्राजकस्य । अथातोऽस्थिसञ्चयनम् । अथातोऽत्र बलिः । अथ गर्भिण्यामन्तर्वत्न्यां मृतायां क्रियेत आहिताग्निश्चेत् आपद्युक्तम् । यथो एतन्न प्राक् चौलात् । अथ हैके तूष्णीमितरेषाम् इममग्ने चमसं यथा पिता ।

Here a few stanzas from the end of a work named Bōdhāyanaparakārikā are given.

सहस्रेत्यनुवाकेन कृत्वा विष्णुं प्रदक्षिणम् ॥
व्याहृत्य विष्णुमुद्वास्य कूर्चग्रन्थिं विसृज्य च ।
अन्नशेषं च पक्वं च प्राशयेत् पुत्रलब्धये ॥

Colophon:

इति बोधायनापरकारिका समाप्ता ॥

No. 1233. पितृमेधप्रयोगरत्नमाला.

PITṚMĒDHAPRAYŌGARATNAMĀLĀ.

Pages, 4. Lines, 40 on a page.

Begins on fol. 26*a* of the MS. described under No. 1174.

Incomplete.

Procedure connected with funeral rites; described in verse in accordance with Bōdhāyana.

Beginning :

अभिवन्द्य मुनिं कण्वं तत्प्रसादान्निगद्यते ।
प्रयोगरत्नमालेयं पितृमेधाख्यसूत्रगा ॥

गोत्रनाम मृतस्योक्त्वा सङ्कल्प्यैव तु संस्क्रिया ।
प्राचीनावीतिना कार्यः प्रेतकर्म(र्मा)स्य सर्वदा ॥

निवीतिनो वहेयुस्ते ज्ञातयोऽन्ये च वाहकाः ।
पुत्रः कर्ता सदा पित्रोर्ज्ञातयस्तदसंभवे ॥

न पुत्रस्य पिता कुर्यात् पितृमेधं [न]कदा चन ।
अथ स्नेहेन वा कुर्यात् सपिण्डीकरणं विना ॥

स्वपुत्र(ा)भाव आसन्नस्सपिण्डः पितृमेधकृत् ।
दक्षिणाग्नौ दहेदन्यः पुत्राच्छिष्याच्च सादरात् ॥

End :

सहस्राभ्य इति द्वाभ्यां दशात्मकसमाख्यकैः ॥
उपतिष्ठेत तैस्सर्वैर्दीप्तमग्निमुपोषयेत् ।
य एतस्य पथो मन्त्राः प्रयासायेति तैस्सह ॥

No. 1234. भारद्वाजपितृमेधसूत्रम्.
BHĀRADVĀJAPITṚMĒDHASŪTRAM.

Substance, palm-leaf. Size, 13⅜ × 1½ inches. Pages, 18. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Āturasannyāsa-vidhiḥ 10*a*.

Contains 14 Khaṇḍas.

Ritualistic procedure relating to funeral rites; by Bhāradvāja; adopted by the followers of Āpastamba.

Beginning :

अथातः पैतृमेधिकं दहनमाहिताग्नेर्मरणसंशये प्राचीनावीती दहनदेशं जोषयते दक्षिणा प्रत्यक् प्रवणमनिरिणमसुषिरमनूषु(ष)रमभङ्गुरमनूपहतमविस्रग्धा(गन्ध्या)र्यमनूपच्छिग्ध(द्र)प्रवणं यस्माद्दक्षिणा प्रतीच्यापो निस्सृत्योदीच्य(ा) एत्य महानदीमुपेत्य.

End :

अग्निर्होतेत्याज्याहुतीर्हुत्वा समित्सन्नहनं जयादि प्रतिपद्यते परिषेचनान्तं कृत्वात ऊर्ध्वं पैतृमेधिकमायवोदनप्राशनान्तान् परब्रह्मेत्याचक्षते । तान्न साधारणे श्मशाने प्रयुञ्जीत नानाचार्याय द्विजातीनामेव सन्तिष्ठते ब्रह्ममेधो ब्रह्ममेधः

No. **1235.** भारद्वाजपितृमेधसूत्रम्.

BHĀRADVĀJAPITṚMĒDHASŪTRAM.

Substance, palm-leaf. Size, 15¾ × 1 inches. Pages, 11. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 29*a*. The other works herein are Āpastambapitṛmēdhapraśnabhāṣya 1*a*, Dattasiddhāntamañjarī 36*a*, Putrīkaraṇamīmāṁsā 49*a*, Dattakacandrikā 89*a*.

This work is different from another of the same name described under the last number, though the contents are similar.

Beginning :

अथातः पैतृमेधिकमनाहिताग्नेर्वक्ष्यते । मरणसंशये ब्रह्मविदाप्नोति परम् । भृगुर्वै वारुणिरित्येतावनुवाकौ ब्रह्मविदो दक्षिणे कर्णे जपति इतरस्यायुषः प्राणःसन्तन्विति.

End :

उद्वयं तरण्ये(णी)त्याभ्यामुपस्थाय दिनेश्वरम् ।
धातायुष्ट इत्युक्त्वा स्नानमन्यत्समम्भवेत् ॥

No. 1236. भारद्वाजपितृमेधसूत्रम्.
BHĀRADVĀJAPITṚMĒDHASŪTRAM.

Pages, 24. Lines, 15 on a page.

Begins on fol. 1*a* of the MS. described under No. 1197.

Copied for the library in 1895.

Incomplete.

No. 1237. आपस्तम्बपितृमेधप्रश्नभाष्यम्.
ĀPASTAMBAPITṚMĒDHAPRAŚNABHĀṢYAM.

Pages, 42. Lines, 24 on a page.

Begins on fol. 1*a* of the MS. described under No. 1198.

Contains 7 Paṭalas. The commentary is said in the colophon to have been composed by Kapardisvāmin.

Beginning:

पैतृमेधिकं कर्म वक्ष्यते । पूर्वोक्तानि कर्माणि जीवतां पुरुषाणां जातकर्मप्रभृतीनि नित्यनैमित्तिककाम्यश्राद्धप्रायश्चित्तानि उपनयनान्तानि उभयं साधयन्ति । पुरुषसंस्काराश्च नित्यानि ब्रह्मचर्यान्तानि नित्यमनृणसंस्तुतेः, तथा सोमान्तानि प्रजोत्पत्तिश्च । प्रायश्चित्तन्तु द्विविधं पुरुषापराधे कर्मापराधे च । तेन सर्वस्मृत्युक्तानि जीवताम् । अथेदानीं मृतस्य कर्मोच्यते । पुरुषाहुतिर्ह्यस्य प्रियतमेति विज्ञायते । आहिताग्नेर्मरणसंशये दहनार्थमवकाशं जोषयते सेवतेऽध्वर्युः ।

End:

एतास्मिन्नेवाग्नावेतस्मिन्नेव दिवसे उपनयनान्तं कृत्वा द्वादशरात्रं व्रतं चरित्वा वेदव्रतानि च . . . भिः परिसमाप्य तयैव जायया . . सुवर्णया सहाग्नीनाधाय व्रात्येन पशुना यजेत । गृहं गत्वाग्नये कामायेष्टिं निर्वपेत् । अथ नैमित्तकार्याणि कुर्यात् ।

इति सप्तमः पटलः ॥

Colophon:

इत्यापस्तम्बसूत्रभाष्ये कपर्दिस्वामिकृते पितृमेधप्रश्नः समाप्तः ॥

No. 1238. आपस्तम्बपितृमेधप्रश्नभाष्यम्.

ĀPASTAMBAPITṚMĒDHAPRAŚNABHĀṢYAM.

Pages, 95. Lines, 26 on a page.

Begins on fol. 1*a* of the MS. described under No. 1220.

Contains the commentary of Gārgya Gōpālayajvan on the Pitṛmēdhasūtras for 5 Paṭalas.

Beginning :

आपस्तम्बमृषिं वन्दे यत्प्रसादादमी वयम् ।
स्वर्गादिमोक्षपर्यन्तां वैदिकीं सिद्धिमाप्नुमः ॥
ग्रन्थानालोच्य भाष्यादीन् गार्ग्यगोपालयज्वना ।
आपस्तम्बनिबद्धस्तु पितृमेधोऽनुवर्ण्यते ॥

इह तावद्भगवता सूत्रकारेण व्याख्यातानि वैतानिकानि भाष्या(गार्ह्या)णि च कर्माणि । अथातः पैतृमेधिकं दहनं, पुरुषाहुतिर्य(र्ह्य)स्य प्रियतमेति विज्ञायते । अथेदानीं पितृमेधाख्यः पुरुषसंस्कारो व्याख्यायते—तस्योभयं प्रयोजनं पारलौकिकफलानुभवयोग्यतापत्तिः, कर्मोपयुक्तशरीरप्रतिपत्तिश्चेति । वदिष्यति चाचार्यः यत्तु श्मशानमुच्यते नानाकर्मणामेषोऽन्ते पुरुषसंस्कारो विधीयते । ततःपरमनन्तं फलं स्वर्गशब्दाच्छ्रूयत इति । तत्रैवं विवेको द्रष्टव्यः—

खननन्दहनन्त्याग इति या त्रिविधोच्यते ।
शरीरसंस्क्रिया सास्य परलोकजयावहा ॥
विधिश्श्मशानसंयुक्तो योऽन्यस्सञ्चयनादिकः ।
कर्मोपयुक्तदेहस्य प्रतिपत्त्यर्थ एव सः ॥ इति ॥

End :

अथैनमुपतिष्ठते पृथिवीं गच्छान्तरिक्षं गच्छेति । एनं मृतं जघनेन चितिं ख(क)ष्वादिसमानमासा(स्नाना)न्मृदा स्नातीत्येके व्याख्यातमेतत्सूत्र-

इयं ततः पूर्वोक्तक्रमेण पशुमांसादिना सद्यः पक्केन ब्राह्मणान् भोजयेत् ॥

Colophon:

समाप्ता लोष्टचितिः ॥

इति श्रीगार्ग्यगोपालयज्वना विरचिते आपस्तम्बपितृमेधनिबन्धने पञ्चमः पटलः ॥

आपस्तम्बापितृमेधनिबन्धनं समाप्तम् ॥

No. 1239. आपस्तम्बपितृमेधप्रश्नभाष्यम्.

ĀPASTAMBAPITṚMĒDHAPRAŚNABHĀṢYAM.

Pages, 56. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 1235.

The commentary of Gōpālayajvan; breaks off in the second Paṭala. Same as the last. But the colophon on fol. 19*a* is इति भारद्वाजसूत्रे प्रथमः पटलः.

No. 1240. आपस्तम्बपितृमेधप्रश्नभाष्यम्.

ĀPASTAMBAPITṚMĒDHAPRAŚNABHĀṢYAM.

Substance, palm-leaf. Size, 15¾ × 1½ inches. Pages, 130. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Suvāsinīprāyaścittam 66*a*.

Contains 5 Paṭalas of the commentary of Gōpālayajvan.

Same as No. 1238.

No. 1241. पितृमेधसारप्रश्नव्याख्यानम्—सुधीविलोचनम्.
PITṚMĒDHASĀRAPRAŚNAVYĀKHYĀNAM : SUDHĪVILŌCANAM.

Substance, palm-leaf. Size, 20½ × 1⅜ inches. Pages, 367. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete in 5 Paṭalas or 15 Khaṇḍas.

By Vaidikasārvabhauma *alias* Vēṅkaṭanātha, son of Śrīraṅgār-y ! Hāritagōtra. In a colophon found in the MS. described under the next number the epithet मित्रतात is given to the author. It means the same as Tōḻappar in Tamil.

Beginning :

विशालनेत्रं परिपूर्णगात्रं
सीताकळत्रं सुरवैरिशत्रुम् ।
जगत्पवित्रं परमार्थतत्त्वं
श्रीरामरत्नं प्रणतोऽस्मि नित्यम् ॥
औदर्किकानर्थहरैरवश्यै-
राराध्यते यस्त्रिविधार्थकृत्यै(:) ।
पुंसे समस्तात्मभुवे नम(पुर)स्ता-
त्तमःपरस्ताद्वसते नमस्तात् ॥
शिष्टानुशिष्टः पितृमेधसारं
प्रश्नं समाख्यां प्रथयन् समाख्याम् ।
व्याख्यानमाख्यातुमहं यतिष्ये
बुधा विधाध्वम्(इहाध्व)स्खलितं क्षमध्वम् ॥
प्रश्नः प्रसिद्धः पितृमेधसारः
कर्ता तथा वैदिकसार्वभौमः ।
सन्तोऽङ्गचकुर्वन्नलमागु(प्र)हान्यै-
रन्ये(न्यैः)भजध्वं भविता विवेकः ॥

* * * *

गृह्याणि भाष्याणि बहूनि बह्वीः
स्मृतीस्समीक्ष्य व्यधषी(धित)स्फुटार्थम् ।
प्रश्नं न तद्याकरणेऽतियत्नो
व्याख्यामिषात्साक्षिवचांसि वक्ष्ये ॥

क्वचिदत्र हि सूत्रार्थो वचनैः प्रतिपाद्यते ।
वचनार्थः क्वचित्सूत्रैरुभयार्थं क्वचिन्मया ॥

पितृमेधेषु सारोऽयं प्रश्नस्सारार्थनिर्णये ।
यत्सुधीलोचनं ख्यातं तद्याख्यानं विरच्यते ॥

अथातोऽवभृथेष्टिं वक्ष्यामः । अत्र मङ्गळाद्यनेकार्थपरत्वेऽप्यथशब्दस्या-तश्शब्दशिरस्कत्वादानन्तर्यमेवार्थः ।

End:

"श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् ।
अमावास्यादिनियतं मासि संवत्सरादृते ॥"

इति हारीतः ॥ निर्गत(गद)व्याख्यानमेतत् ॥

द्विरुक्तिः समाप्तिं द्योतयति ॥ इति पञ्चमखण्डः ॥ पञ्चमपटलं समाप्तम् ॥

Colophon:

इति हारीतकुलतिलकस्य सरस्वतीवल्लभापरनामधेयस्य श्रीरङ्गार्यपुत्रस्य यजुर्निधे(:) श्रीवेङ्क(ट)नाथस्य वैदिकसार्वभौमस्य कृतिषु पितृमेधसारप्रश्न-व्याख्यानं समाप्तम् ॥

वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः ।
तद्धि कुर्वन्यथाशक्ति[:] प्राप्नोमि(ति)परमां गतिम् ॥

No. 1242. पितृमेधसारप्रश्नव्याख्यानम्—सुधीविलोचनम्.

PITṚMĒDHASĀRAPRAŚNAVYĀKHYĀNAM : SUDHĪVILŌCANAM.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 206. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

The first volume of Sudhīvilōcana containing Paṭalas 1 and 2 fully and the 3rd Paṭala incompletely. Same as the last, except that the initial stanzas are different from those of the last.

Beginning :

वागीश्वरं हयग्रीवं प्रणमामि सहस्रशः ।
गङ्गाप्रवाहवद्यस्य स्मरणाद्वाग्विजृम्भते ॥
स्फटिकोदर्कसङ्काशं रम्यं सिंहासनस्थितम् ।
पद्मया सहितं नित्यं हयग्रीवं भजाम्यहम् ॥
शुक्लां . शान्तये । यस्य द्वि . श्रये ।

Colophon :

इति हारीतकुलतिलकस्य श्रीमद्वेङ्कटनाथस्य सर्व(र)स्वतीवल्लभापरनामधेयस्य मित्रतातस्य वैदिकसार्वभौमस्य कृतिषु पितृमेधसारप(प्र)श्नव्याख्याने द्वितीयः पटलः ॥ An index is given at the end.

No. 1243. पितृमेधसारप्रश्नव्याख्यानम्—सुधीविलोचनम्.

PITṚMĒDHASĀRAPRAŚNAVYĀKHYĀNAM : SUDHĪVILŌCANAM.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 204. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

The second volume commences about the 3rd Paṭala and concludes with the 5th Paṭala. Same as the last. There is an index at the end.

Colophon :

इति हारीतकुलतिलकस्य सरस्वतीवल्लभाचार्यपौत्रस्य श्रीरङ्गनाथार्यपुत्रस्य यजुर्निधेः श्रीवेङ्कटनाथस्य वैदिकसार्वभौमस्य कृतिषु पितृमेधसारप्रश्नव्याख्यानं समाप्तम् ॥

No. 1244. पितृमेधसारव्याख्यानम्—सुधीविलोचनम्.

PITṚMĒDHASĀRAVYĀKHYĀNAM: SUDHĪVILŌCANAM.

Substance, palm-leaf, (Śrītāla). Size, 25½ × 2½ inches. Pages, 64. Lines, 11 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Breaks off in Prōtakṛtyadravyaniyama. This MS. commences with the stanza beginning with औदर्किक.

No 1245. पितृसंस्कारविषयः.

PITṚSAMSKĀRAVIṢAYAḤ.

Substance, palm-leaf. Size, 14⅜ × 1½ inches. Pages, 218. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old. As the last 4 leaves are injured, no extract from the end is given.

This work treats of the procedure relating to funeral rites.

Beginning :

महतां सेवया योऽर्थः पैत्रे संशीलितः पुरा ।
. . . . यत्नोऽयं क्रियतेऽधुना ॥

* * *

. . बन्धादीन् प्रौढानाश्चैव सङ्ग्रहान् ।
ग्रन्थानालोक्य विविधाननुष्ठानं गरीयसाम् ॥
अकल्याणामपि प्रायः प्रयोगे पटुतासये ।
सन्दिग्धार्थप्रकाशाय सङ्क्षिप्यैषा प्रकाश्यते ॥

कारिकास्त्वत्र लिख्यन्ते प्रायशः . . . दिताः ।
सङ्क्षेप स्फुरणार्थाय नव्याः काचिदुदीरिताः ॥
विना मूलप्रमाणेन न किञ्चिदपि वर्ण्यते ।
तस्मादत्रोदितार्थेषु विस्रम्भः क्रियतां बुधैः ॥
प्रेतं पितृन्(तॄं)श्च निर्दिश्य भोज्यं यत्प्रियमात्मनः ।
श्रद्धया दीयते यत्तु तच्छ्राद्धं परिकीर्तितम् ॥

विष्णुपुराणे

पूर्वाः क्रिया मध्यमाश्च तथा चैवापराः क्रियाः ।
त्रिप्रकाराः क्रिया ह्येताः तासां भेदमिमं शृणु ॥

INDEX.

[NOTE.—The numbers refer to pages, and the names printed in *italics* are those of works that are described.]